**PURANETIHASA**

**ACHARYA 2nd YEAR**
**Course/Paper.6**

**PART-A**

श्रीमद्भागवतमहापुराणम् (दशमस्कन्धे उत्तरार्धे ५०-७५ अध्यायाः)

# *Śrīmadbhāgavatamahāpurāṇam*

***(Daśamaskandhē uttarārdhē 50-75 adhyāyāḥ)***


**CENTER OF DISTANCE & ONLINE EDUCATION**

***(Formerly Directorate of Distance Education)***

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमोऽध्यायः

## प्रस्तावना –

अष्टादशमहापुराणेषु श्रीविष्णोः स्वरूपभूतं तथा समेषां वैष्णवजनानां प्रवृत्तये मोक्षाख्यपरमतत्त्वस्य सारभूतं स्थलं भवति श्रीमद्भागवतमहापुराणम्। अस्मिन् पुराणे श्रीकृष्णस्य लीला यथा समुपवर्णिता दृश्यते न तथा अन्येषु पुराणेषु श्रूयते। इदं च महापुराणं  षट्सात्विकपुराणेषु अन्यतमो वर्तते। अस्मिन् भागवतमहापुराणे यद्यपि विष्णोः स्वरूपात्मकस्य श्रीकृष्णस्य चरितं मार्मीकरीत्या प्रतिपादितं दृश्यते तथापि भगवतः नारायणस्य विविधानाम् अवताराणां वर्णनं, जगदुत्पत्तिविषयकं विविधानि तत्त्वानि, पुराणानां लक्षणानि, स्वरपभेदाश्च श्लाघ्यन्ते। श्रीमद्भागवगतमहापुराणस्य दशमस्कन्ध अतीव गुरुत्वपूर्णो वर्तते। अस्य श्रीमद्भागवतमहापुराणस्य तावदुद्देश्यमस्ति यत् वर्णयितुं न शक्यते। अस्य महापुराणस्य अध्ययनादेव असीमितफलं लभ्यते।

## उद्देश्यम् –

अस्मिन् अध्याये पाठकाः एतान् सर्वान् विन्दून् वेदिष्यन्ति।

- श्रीकृष्णजरासन्धयोः सह युद्धः
- द्वारकायाः निर्माणम्
- कालयवनस्य विनाशः
- मुचुकुन्दस्य चरितम्
- वलरामस्य विवाहः
- रुक्मिण्याः सन्देशः

## श्रीकृष्णजरासन्धयोः सह युद्धः

भगवान् श्रीकृष्णः मथुरामागत्य कंसस्य संहारं चकार। ततः कंसस्य ये द्वे भार्ये आस्ताताम् ते द्वे स्वभर्तुः मरणानन्तरं स्वपितृगृहं प्रति गतवत्यौ। एतयोः द्वयोः अस्तिप्राप्त्योः पिता जरासन्धः आसीत्। एतयोः द्वयोः दुःखं दृष्ट्वा पिता जरासन्धः मथुरापुरीं प्रति सैन्यं स्वीकृत्य युद्धनिमित्तं गतवान्। सः जरासन्धः धरापृष्ठे यदुवंशस्य संहारनिमित्तं दृढ़प्रतिज्ञां स्वीकृतवान्। भगवान् श्रीकृष्णः एतस्य अगमनानन्तरं चिन्तितवान् यत् एकस्मिन् समये एव बहूनां पापीनां संहारो भविष्यति। परन्तु यदि जरासन्धस्य संहारः करिष्यते तर्हि अन्ये ये पापिनः सन्ति तेषां कदाचित् संहारः न भविष्यति, अतः जरासन्धमतिरिच्य अन्येषां समेषाम् अवश्यं संहारो भविष्यति। मगधराजः जरासन्धः समेषां सैन्यानां सहायेन चतुर्षु दिक्षु मथुरां न्यरुणत्। साधुजाननां निवृत्तिनिमित्तं दुष्टानां प्रकोपप्रशान्तये च सर्वान् हनिष्यामि इति भगवान् श्रीकृष्णः चिन्तयामास। एतस्मिन् अवसरे आकाशमार्गात् सूर्यवर्चसौ सद्यः द्वौ रथौ ससूतौ समुपस्थितौ। तस्मिन् रथे भगवतः वलरामस्य युद्धायूधं तथा श्रीकृष्णस्य सर्वमस्त्रशस्त्रं च आसीत्। भगवतः श्रीकृष्णस्य रथस्य सारथी आसीत् दारुकः । यदा श्रीकृष्णः मथुरातः बहिः अगमत् तदा पाञ्चजन्यशङ्खं न्यनादात्। तस्य शङ्खस्य नादं श्रुत्वा सर्वे भयेन अकम्पन्। ततः भगवान् श्रीकृष्णः स्वीयपराक्रमेण योद्धुं जरासन्धाय परामृषत्। तदानीं मथुरायाः नार्यः सर्वाः अपि स्वीयगृहस्य उपरि गत्वा कौतुहलेन युद्धमपश्यन्। तदानीं भगवतः श्रीकृष्णस्य गरुडवर्णस्य ध्वजं तथा वलरामस्य तालवृक्षसदृशध्वजं न दृष्ट्वा भयं प्राप्तवत्यः। यदा भगवान् श्रीकृष्णः अपश्यत्, जरासन्धस्य सर्वे सैन्याः चतुर्षु दिक्षु आक्रमणमकुर्वन्, तदानीं स्वीयशार्ङ्गधनुः व्यस्फुर्जयत्। तेन सर्वे सैन्याः आहताः अभूवन्। जरासन्धस्य अनेन चतुराङ्गणी सेना हता जाता। महावली वलरामः स्वीयपराक्रमेण स्वीयमुसलेन सर्वान् जघान। सर्वे जरासन्धस्य सैन्याः तृणा इव मृताः जाताः। तदानीं समेषां रक्तेन रक्तनदी प्रवाहिता जाता। तया नद्या सर्वे सैन्याः क्षतविक्षतरूपेण प्रवाहिताः अभवन्। शुकदेवः ब्रुते हे परीक्षित! भगवतः श्रीकृष्णस्य इयं लीला अवर्णनीया वर्तते। यः परमेश्वरः परात्परः अनादिकारणभूतः सः भगवान् श्रीकृष्णः जरासन्धस्य हननं न कृत्वा तं तत्याज। ततः लज्जितः जरासन्धः तपः आचरणार्थं जगाम। मथुरायां सुतमागधवन्धिभिः भगवतः विजयं श्रुत्वा शङ्खनादेन उपगीयमानः आसीत्। कृत्स्ना नगरी विजयपताकाभिः आवृता आसीत्। मगधराजः जरासन्धः एवं

सप्तदशवारं तावत् अक्षौहिणीवलं नीत्वा यदुभिः सह युयुधे। वृष्णयः सर्वे अपि श्रीकृष्णस्य तेजसा सर्वान् नाशितवन्तः।

बोधप्रश्नः

१. कंसस्य के द्वे भार्ये आस्ताताम्?

२. जरासन्धः कस्य देशस्य राजा आसीत्?

३. भगवतः श्रीकृष्णस्य शङ्खस्य नाम किम् आसीत्?

## द्वारकायाः निर्माणम् –

एतादृशरूपेण जरासन्धः बहुभिः सन्यैः सह सप्तदशवारं यादवैः सह युयोध। ततः सर्वेऽपि संहृताः अभूवन्। यदा अष्टादशवारं योद्धुं प्रयत्नं चकार, तदानीं नारदेन प्रेषितः कालयवनः समुपस्थितो बभूव। कालयवनः तदानीं अतीव पराक्रमशाली योद्धा आसीत्। तस्य सम्मुखे न कोऽपि स्थातुम् अशक्नोत्। सः कालयवनः तिसृभिः म्लेच्छकोटिभिः सह मथुरां रुरोध। एतस्मिन् समये श्रीकृष्णः चिन्तितवान् यत् द्वावपि यदि एकस्मिन् समये मथुरां प्रति आक्रमणं करिष्यतः तर्हि मथुरायाः जनाः भीताः भविष्यन्ति। अतः एतादृशं पुरमेकं निर्मामि, यस्मिन् पुरे साधारणानां मनुष्याणां प्रवेशः सहजं न भविष्यति। एतादृशं चिन्तनं कृत्वा वलरामेण सह वार्तां कृत्वा द्वारकापुर्य्याः निर्माणं कृतवान्। अद्भुतनगरी द्वारकापुरी आसीत्। यस्याः नगर्य्याः निर्माणम् अन्तः समुद्रे अचीकरत्। उत्तमवास्तुकलामाध्यमेन नगर्य्याः निर्माणम् अभूत्। विविधानि उद्यानानि तथा विचित्राणि उपवनानि यथास्थानं द्वारकापुर्य्यामासीत्। नगरी बहु उपरि आसीत्, यद् दृष्ट्वा एवं मन्यते यत् आकाशेन सह समान वर्तते। स्फटिकमण्याः अट्टालिकाः अत्युच्चकपाटादयः आसन्। खाद्यशस्यानि स्थापनार्थं विविधानि पात्राणि आसन्। तस्मिन् पात्रे विविधप्रकाराणि शस्यानि च आसन्। सुवर्णनिर्मितं भवनं मनोहरमासीत्। भवनानि शिखरसदृशानि आसन्। तस्यां नगर्य्यां विविधवर्णानां जनानां निवासस्थानमासीत्। तत्र मध्ये भगवता श्रीकृष्णेन सह वलरामः

उग्रसेनादय: सर्वे यादवा: आसन्। तत्र देवराज: इन्द्र: पारिजातं पुष्पं प्रेषितवान्। तेन पुष्पेन सह सुधर्मा सभाकक्षामपि अप्रेषयत्। यस्यां सभाकक्षायां ये उपविष्टा: भविष्यन्ति, तेषां मर्त्त्यगतक्षुधापिपासादि सर्वे गुणा: अपगता: भविष्यन्ति। द्वारकां प्रति वरुणदेव: विविधान् श्वेताश्वान् प्रेषितवान्। तेषु केषाञ्चन अश्वानां वर्ण: आसीत् श्यामल:। ये च अश्वा: स्वीयमनोवेगेन धावितुं शक्तवन्त:। भगवान् श्रीकृष्ण: विविधान् लोकपालान् नियुक्तिं कृतवान् ये च लोकपाला: विविधेषु स्थानेषु द्वारकापुर्य्याम् आसन्। भगवान् श्रीकृष्ण: स्वीययोगवलेन सर्वान् जनान् सुप्तावस्थायां तत्र अवस्थापनं कारितवान्। एवं रूपेण द्वारकापुर्य्या: निर्माणं बभूव।

बोधप्रश्न:

१. समुद्रे का नगरी आसीत्?

२. वरुण: द्वारकाया: कृते किं प्रेषयामास?

३. उग्रसेन: क:?

## कालयवनस्य विनाश –

कालयवन: मथुरापुरीं प्रति गतवान्। पूर्वमेव नारदमहर्षि: तं कालयवनं भगवत: श्रीकृष्णस्य वेशं भूषां च अज्ञापयत्। कदाचित् भगवान् श्रीकृष्ण: द्वारकपुर्य्या: निर्माणानन्तरं सर्वान् यादवान् स्वीकृत्य स्वयोगवलेन स्थापितवान्। तत: भगवान् स्वयं मथुरां प्रति गत्वा तत: बहिरागतवान्। भगवत: शरीरस्य कान्ति: अतुलनीया। यदा स: भगवान् मथुराया: द्वारप्रदेशात् बहि: आगतवान् तदानीं तस्य शरीरस्य कान्ति: निर्मलचन्द्रमा इव आसीत्। भगवत: श्रीवत्सवक्षसं दीर्घचतुर्वाहुं कौस्तुभमुक्तकन्धरं दृष्ट्वा अयमेव श्रीकृष्ण: इति ज्ञातवान्। नारदेन यानि लक्षणानि भगवत: प्रतिपादितानि तानि सर्वाणि लक्षणानि भगवत: सविधे दृष्ट्वा तेन सह योद्धुं समागतवान्। तत: भगवान् श्रीकृष्ण: तं प्रति अग्रे गतवान्। अयं श्रीकृष्ण: अस्त्रं विना कालयवनं प्रति यदा जगाम तत: कालयवन: अपि विना अस्त्रं तस्य श्रीकृष्णस्य प्रतिरोधनिमित्तं प्रतिजगाम। यदा भगवान् सम्मुखं प्रति आगतवान् तदानीं स्वयं भगवान्

अग्रे धावनं कृत्वा गतवान्। तं दृष्ट्वा कालयवनः अपि तस्य अनुधावनं कृत्वा तिष्ठ तिष्ठ इति उक्त्वा धावितवान्। बहु धावनानन्तरं श्रीकृष्णः तं कालयवनं एकं गुह्वरं प्रति नीतवान्। यदा अनुधावनं कृत्वा कालयवनं गुह्वरे प्राविवेश, तदानीं कुत्र श्रीकृष्णः लुक्कायितोऽभूत् इति अन्वेषणं कृतवान्। तस्मिन् गुह्वरे एकः जनः बहुकालदेव शयने रतः आसीत्। कालयवनः श्रीकृष्णः अयमिति चिन्तितवान्। अयं श्रीकृष्णः बहुकालादेव मद्भयात् अत्र शयनं करोति इति अचिन्तयत्। मूढ़ः श्रीकृष्णः साधुवत् अत्र शेते इति चिन्तयन् कालयवनः स्वीयपादप्रहारं कृतवान्। तस्य पादप्रहारेण सः साधु यदा उत्तिष्ठवान् , तस्मात् शरीरात् अग्निः तत् क्षणात् आजगाम। तेन अग्निना सः कालयवनः विनष्टः जातः। तस्य रुष्टस्य साधोः दृष्टिपातेन अस्य कालयवनस्य विनाशः अभूत्। एवं प्रकारेण कालयवनस्य संहारः भगवतः श्रीकृष्णस्य प्रयासेन बभूव।

बोधप्रश्नः

१. कालयवनं कः प्ररोचयामास ?

२. कः श्रीकृष्णस्य अनुधावनं चकार ?

३. केन श्रीकृष्णस्य लक्षणानि प्रोक्तानि ?

## मुचुकुन्दस्य चरितम्–

कालयवनस्य विनाशविषयं श्रुत्वा राजा परीक्षितः शुकदेवं प्रति अप्राक्षीत् यदयं पुरुषः कः आसीत्? यस्य दृष्टिनिक्षेपेण अस्य कालयवनस्य विनाशः अभूत्। कस्य वंशस्य अयं जनः वर्तते ? कस्य च पुत्रः अयम्? एतस्य परीक्षितस्य प्रश्नेन शुकदेवः ब्रुते हे परीक्षित! अयं महानुभवः पुरुषः इक्ष्वाकुकुले जातः मान्धातृतनयः मुचुकुन्दः इति प्रख्यातः आसीत्। एषः महापुरुषः ब्राह्मणानुरागी, परमभक्तस्तथा सत्यप्रतिज्ञः आसीत्। कदाचित् आसुराणां प्रकोपात् इन्द्रादिदेवाः अतीव भीताः अभूवन्। तेषां समेषां देवानां रक्षार्थं मुचुकुन्दः स्वयं इन्द्रादिदेवानामभयार्थं गतवान्। एवं सर्वान् देवान् अरक्षत्। यदा देवानां सेनापतिकार्त्तिकेयस्य प्रादुर्भावः जातः तदानीं एतस्य किं कार्यं भविष्यति इति

विचिन्तयन् देवाः एतस्य राज्ञः मुचुकुन्दस्य समीपं गत्वा निवेदितवान् यत् भवन्तः इदानीं स्वीयपुरं प्रति गच्छन्तु। तस्मिन् समये कालस्य करालावसरे सर्वे च एतस्य मुचुकुन्दस्य स्वजनाः निहताः जाताः आसन्। यथा कश्चित् पशुपालकः पशून् स्वीय वलेन परिपालयति तथैव कालस्य महिमा वर्तते। अतः किमिच्छन्ति भवन्तः इति प्रश्नं सर्वे च देवाः पृष्टवन्तः। ततः एषः मुचुकुन्दः केवलं निद्रां याचितवान्। कस्यचित् पर्वतस्य गुह्वरे निद्रयां शेतुं एषः मुचुकुन्दः प्रार्थितवान्। ततः देवाः एतस्मै गभीरनिद्रायां शेतुं वरं दत्तवान्। अपि च कथितवान् यदि कश्चित् शयने विघ्नं करिष्यति भवतः दर्शने एव तस्य विनाशो भविष्यति।

ततः भगवान् श्रीकृष्णः बहिरागतवान्। तस्मिन् समये भगवतः श्रीकृष्णस्य शरीरस्य शोभां दृष्ट्वा मुचुकुन्दः भवान् कः इति प्रश्नमप्राक्षीत्। भगवतः शरीरस्य उज्ज्वलशोभया पर्वतगह्वरः अतीव आलोकमयः आसीत्। एतस्य कथनावसरे साक्षात् मुचुकुन्दः स्वीयपरिचयं कथितवान्। ततः श्रीकृष्णः तं मुचुकुन्दं स्वीयमनादित्त्वं तथा विशिष्टस्वरूपस्य रहस्यं कथितवान्। ब्रह्मणः प्रार्थानामङ्गीकृत्य श्रीमन्नारायणः धरापृष्ठे श्रीकृष्णरूपेण अवतीर्णः इति अवादीत्। सहर्षं वसुदेवस्य पुत्रः वासुदेवः इति नाम्ना प्रथितो लोके इति प्रतिपादितवान् साक्षात् श्रीकृष्णः। अतः भगवान् श्रीकृष्णः तं मुचुकुन्दं अवोचत् मद्दर्शनेन जनानां सर्वाभिलाषा पुर्णा भवति अतः भवतः यदिच्छा तत् वरय, अवश्यं फलं प्राप्स्यति । असुराणां दमनार्थं साधूनां रक्षणार्थं मम सृष्टिः। पूर्वजन्मनि कालनेमिः अस्मिन् जन्मनि कंसरूपेण अवतीर्णः आसीत्। तस्य संहारः तथा प्रलम्वादीनामसुराणां हननं कृतवान् इति श्रीकृष्णः अकथयत्। ततः मुचुकुन्दः गर्गाचार्यस्य वचनं स्मारितवान्। ततः मुचुकुन्दः साक्षात् भगवन्तं नारायणं दृष्ट्वा भक्त्या प्रणामाञ्जलिं समर्पितवान्। ततः बहुस्तुतिम् अकरोत्। एवं रूपेण मुचुकुन्दः श्रीकृष्णस्य दर्शनानन्तरम् अशेषपुण्यफलं प्राप्तवान्। ततः स्वीयजन्मनः अशेषत्वं चिन्तितवान्। भगवान् श्रीकृष्णस्य अनुग्रहेण मुचुकुन्दः गन्धमादनपर्वते स्थित्वा भगवतः आराधनं चकार। पर्वताद् बहिरागत्य यदा सम्पूर्णां पृथिवीं दृष्टवान् ततः अवसादमनसा तपः आचरणार्थं पर्वतं प्रति गतवान्। ततः वदरिकाश्रमं प्रति गत्वा ग्रीष्म-शीलकालीन द्वन्दं सोढ्वा भगवतः नित्याराधनं चकार।

बोधप्रश्न:

१. कालयवन: कं श्रीकृष्णमिति विचिन्त्य पादप्रहारं चकार ?

२. मुचुकुन्द: कस्य पुत्रो वर्तते ?

## वलरामस्य विवाह: –

कालयवनस्य विनाशानन्तरं भगवान् श्रीकृष्ण: मुचुकुन्दस्य दर्शनं कृत्वा तस्मै अनुग्रहं कारितवान्। तत: स्वीयलीलाविषयमकथयत्। तत: मथुरां प्रति प्रत्यागमनं चकार। कालयवनस्य विनाशानन्तरं तदीयनि धनानि अपहृत्य द्वारकां प्रति नेतुं प्रयासं कारितवान्। तदानीं मगधराज: जरासन्ध: स्वीयसैन्यं नीत्वा आक्रमणं कर्तुं प्रयासम् आचरितवान्। एतान् दृष्ट्वा कृष्णवलरामौ द्वौ मथुरात: बहुदूरं यावत् धावितवन्तौ। तयो: अनुधावनं कृत्वा सर्वे रथाधिपतय: स्वीयवाहनानि स्वीकृत्य अग्रे गतवन्त:। तत: तौ द्वौ कृष्णवलरामौ प्रवर्षणपर्वतस्य उपरि आरोहणं कृतवन्तौ। यदा जरासन्ध: तौ द्वौ न अपश्यत् बहु अन्वेषणं कृतवान्। तत: पर्वते अग्निसंयोगं चकार। अध: अग्निसंयोगं दृष्ट्वा तौ द्वौ अध: कुदनं चक्रतु:। एतादृशरूपेण अधोभागे पतितौ येन केनापि न तौ दृष्टौ। तत: मथुरां त्यक्त्वा द्वारकापुरीं प्रति जग्मतु:। तदानीं मगधराज: अपि तौ द्वौ हतौ इति विचिन्त्य स्वीयपुरं प्रति जगाम। तत: आनर्त्तदेशस्य राजा श्रीमान् रैवत: ब्रह्मण: दर्शनार्थं ब्रह्मलोकं गतवान्। तत्र अहोरात्रात्मकं दिनमेकं न्यवसत्। तत: ब्रह्मण: दर्शनानन्तरं यदा ब्रह्म प्रोक्तवान् तत: युगद्वयं मर्त्यलोके व्यतीतोऽभूत्। तत: ब्रह्मण: आज्ञया रैवतस्य कन्यां रेवतीं वलरामाय दत्तवान्। वलरामेण सह रेवत्या: विवाह: अभवत्।

बोधप्रश्न:

१. आनर्त्तदेशस्य राजा क: आसीत् ?

२. कृष्णवलरामौ कस्य पर्वतस्योपरि आरोहणं चक्रतु: ?

**रुक्मिण्याः सन्देशः –**

विदर्भदेशस्य नरपतिः भीष्मकः आसीत्। तस्य भीष्मकस्य पञ्चपुत्राः तथा एका कन्या आसीत्। ज्येष्ठपुत्रस्य नाम रुक्मी तथा अन्येषां पुत्राणां नामानि आसन् यथा – रुक्मरथः, रुक्मवाहुः, रुक्मकेशः, रुक्ममाली। एतेषामतिरिच्य अस्य विदर्भदेशस्य नरपतेः एका परमसुन्दरी वुद्धिमती कन्या आसीत् यस्याः नाम रुक्मिणी। या परमसौन्दर्यवती आसीत्। भगवतः श्रीकृष्णस्य विविधानि चरितानि श्रुत्वा तं वररूपेण मनसि चिन्तितवती रुक्मिणी। उदारतायामपि एषा कन्या अतीव महती आसीत्। तदर्थं कन्यायाः विवाहार्थं प्रस्तावं याचितवान्। एतेन रुक्मीमतिरिच्य अन्ये सर्वेऽपि भ्रातरः आज्ञां दत्तवन्तः। परन्तु तस्य विद्वेषभावः श्रीकृष्णं प्रति तथा आसीत् येन सः परिणेतु अनुज्ञां कृतवान्। तथा रुक्मिण्याः योग्यवरनिमित्तं शिशुपालं चित्तवान्।

एतेन क्षुब्धमनसा रुक्मिणी स्वीयप्रदेशस्य एकेन ब्राह्मणेन सह स्वीयलिखितं पत्रं प्रेषितवती। सः ब्राह्मणः द्वारकां प्रति गतवान्। तत्र गत्वा श्रीकृष्णस्य दर्शनं प्राप्तवान्। दर्शनानन्तरं ब्राह्मणं दृष्ट्वा भगवान् श्रीकृष्ण अतीव प्रेम्णा तस्य ब्राह्मणस्य सत्कारं चकार। विविधान् अलङ्कारान् दत्वा भोजननिमित्तं प्रार्थितवान्। ततः भोजनानन्तरं तेन सह वार्तां कर्तुं तस्य भवनं प्रति आजगाम। ततः ब्राह्मणाय परिपप्रच्छ यत् आगमनस्य का वा अभिलाषा वर्तते। ततः ब्राह्मणः श्रीकृष्णस्य बहुविधमभ्यर्थनां कृत्वा रुक्मिण्याः सन्देशप्रदानार्थं प्रयत्तवान्।

रुक्मिण्याः सन्देशः एवमासीत् यत् हे त्रिभुवनसुन्दर परमपुरुषोत्तम! भवतः दर्शनं तथा गुणश्रवणानन्तरं श्रोतृणां कर्णपथमाध्यमेन शरीरस्य ज्वला शान्तिर्भवति। धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थानां प्राप्तिर्भवति। सौन्दर्यादिगुणेषु अपि भवान् अद्वितीयः। यस्य तुलनां कर्तुं न कोऽपि समर्थः। मर्त्यलोके भवादृशः न कश्चित् जनः विद्यते। मम विवाहात् प्राक् भवान् अत्रागत्य ममापहरणं कुर्वन्तु। मम हरणस्य विषये अहं यथा वदिष्यामि तद्रुपं कृत्वा स्वीकुर्वन्तु। कुलपरम्परानुसारं विवाहस्य पूर्वदिनं कुलदेव्याः दर्शनार्थं महती शोभायात्रा भविष्यति। शोभायात्रायामस्यां राजप्रासादात् बहिः गिरिजादेव्याः मन्दिरं प्रति गमनमनिर्वार्यम्। तस्मिन् समये ममापहरणं कृत्वा स्वीयनगरीं प्रति नयन्तु। एवं प्रकारेण रुक्मिण्याः सन्देशं स्वीकृत्य गोपनरूपेण ब्राह्मणः श्रीकृष्णस्य समीपे अश्रावयत्।

| बोधप्रश्नः |
| --- |
| |

१. रुक्मिणी केन सह सन्देशं प्रषयामास ?

२. विवाहात् प्राक् कस्याः देव्याः दर्शनार्थम् रुक्मिणी गतवती।

३. रुक्मिण्याः पिता कः ?

**सारांशः –**

अध्यायेऽस्मिन् कंसस्य संहारानन्तरं तस्य द्वयोः भार्ययोः स्वपितृगृहं प्रति गमनविषयः सर्वादौ चर्चितो दृश्यते। तेनैव कारणेन जरासन्धस्य प्रकोपविषयः प्रतिपदितो वर्तते। जरासन्धेन सह भगवतः श्रीकृष्णस्य युद्धः भवति अस्य अध्यायस्य प्रमुखप्रतिपाद्यविषयो । अस्मिन् अध्याये पुनः कालयवनस्य विनाशः प्रतिपादितः। नारदस्य प्ररोचनायामागतस्य कालयवनस्य मुचुकुन्ददर्शनानन्तरं विनाशः अभूत्। कालयवनानन्तरं मगधाधिपतेः जरासन्धस्य प्रवर्षणपर्वते अग्निसंयोगादिविषयाः प्रतिपादिताः श्रूयन्ते। द्वारकापुर्य्याः निर्माणं तथा भगवतः योगवलेन समेषां यादवानां द्वारकापुर्य्यां निवासः अध्यायस्यास्य महन्महत्त्वं प्रतिपादयति। वलरामेण सह रेवत्याः विवाहः तथा श्रीकृष्णमुचुकुन्दयोः कथोपकथनं प्रस्तुतं वर्तते। भगवतः शरीरस्य कान्तिवर्णनं तथा मुचुकुन्दस्य चरितं विविधानां राज्ञां चरित्रचित्रणावसरे पुराणानां लक्षणसंगततां भजते। पुनः विदर्भदेशस्य कन्यायाः रुक्मिण्याः विषये अध्यायेऽस्मिन् समुपवर्ण्यते। रुक्मिण्याः सन्देशः अध्यायस्य महत्त्वं वर्धयति ।

# आदर्शप्रश्नाः

## लघूत्तरीयप्रश्नाः

१. द्वारकापुर्य्याः वर्णनं।

२. कालयवनस्य संहार।

## विश्लेषणात्मकप्रश्नाः

१. जरासन्धस्य प्रकोपं लिखत।

२. वलरामस्य विवाहं प्रतिपादयत।

## निबन्धात्मकप्रश्नाः

१. रुक्मिण्याः भगवन्तं प्रति सन्देशं स्पष्टयत।

२. मुचुकुन्दस्य चरितं स्पष्टयत।

३. श्रीकृष्णजरासन्धयोः यद्धं वर्णयत।

## एकाङ्कप्रश्नाः

१. कंसस्य के द्वे भार्ये आस्ताताम्?

२. कंसस्य श्वशुरः कः?

३. जरासन्धः कस्य देशस्य नृपतिः आसीत्?

४. कालयवनं कः प्ररोचयामास?

५. द्वारकापुर्याः निर्माणं कुत्र अभवत्?

६. कस्य वंशस्य राजा मुचुकुन्दः?

७. इक्ष्वाकुतनयः कः?

८. वलरामस्य पत्न्याःनाम किम्?

९. देवानां रक्षार्थं कः गतवान्?

१०. रुक्मिणी कस्य पुत्री आसीत्?

११. रुक्मिण्याः विवाहः केन सह स्थिरीकृतः?

१२. रुक्मिणी केन सह सन्देशः प्रषयामास?

१३. कः रणभीरु नाम्ना प्रथितः आसीत्?

१४. परीक्षितं प्रति सर्वं कः श्रावयामास?

१५. शुकदेवस्य पिता कः?

**उत्तराणि**

१. अस्तिः प्राप्तिः २. जरासन्धः ३. मगधस्य ४. नारदः ५. समुद्रे ६. इक्ष्वाकु

७. मुचुकुन्दः ८. रेवती ९. मुचुकुन्दः १०. भीष्मकस्य ११. शिशुपालेन १२. ब्राह्मणेन

१३. श्रीकृष्णः १४. शुकदेवः १५. व्यासदेवः

# द्वितीयोऽध्यायः

## प्रस्तावना–

विविधेषु पुराणेषु महाभारते च ये विषयाः अतीव स्वल्परूपेण प्रतिपादिताः ते च विषयाः अत्र भिन्नरूपेण श्रीमद्भागतमहापुराणे प्रतिपाद्यन्ते। श्रीकृष्णस्य विषये अस्मिन् पुराणे मार्मीकतया सर्वं प्रतिपादितं दृश्यते। जरासन्धस्य विषये यद्यपि बहुषु पुराणेषु प्रोच्यन्ते तथापि अत्र आक्रमणस्य कारणं मार्मीकरूपेण प्रतिपादितं विद्यते। भगवतः लीलावर्णनावसरे रुक्मिण्याः विषयः अतीव महत्त्वपूर्णो वर्तते। रुक्मिण्याः हरणं तथा तस्मात् पूर्वं रुक्मिण्याः हरणार्थं यः सन्देशः तया प्रेषितः तत् अस्य महापुराणस्य अपारप्रेम प्रदर्शयति। इदं महापुराणं पुराणेषु श्रेष्ठतमं सुतरामेव। यतोहि साक्षात् व्यासदेवः भगवतः याः लीलाः वर्तन्ते, ताः सर्वाः अपि लीलाः मार्मीकरीत्या अस्मिन् महापुराणे सन्निवेशं कृतवान्। अस्मिन् अध्याये विविधाः रुचिरविषयाः प्रतिपादिताः विद्यन्ते।

## उद्देश्यानि –

अस्मिन् अध्याये भगवतः लीला तथा एतान् सर्वान् विन्दून् ज्ञास्यन्ति।

- रुक्मिणीहरणम्
- शिशुपालादीनां पराजयः
- प्रद्युम्नस्य जन्म
- शम्वराशुरस्य वधः

## रुक्मिणीहरणम् –

तस्मिन् समये परमसौन्दर्यवती तथा वुद्धिमती विदर्भदेशस्य राज्ञ: भीष्मकस्य कन्या आसीत्। अनया कन्यया सह परिणेतुं श्रीकृष्ण: इयेष। परन्तु रुक्मिण्या: भ्राता अस्य विवाहस्य अङ्गीकारं न चकार। अस्या: कन्याया: कृते उत्तमवररूपेण शिशुपाल: योग्य: इति विवेचितवान्। ब्राह्मणमुखादेव एतादृशं वचनं श्रुत्वा तत्क्षणात् भगवान् श्रीकृष्ण: सारथीं प्रति आदिदेश। दारुक: अपि रथं स्वीकृत्य शैव्यसुग्रीवमेघपुष्पवलाहकादीनाम् अश्वानां रथे संयोग: कारितवान्। तत: श्रीकृष्ण: साक्षात् ब्राह्मणेन सह रथमारुह्य विदर्भदेशं प्रति गत्तवान्। तस्मिन् विदर्भदेशे तदानीं महोत्सव: परिपाल्यते स्म। कुण्डिनगरस्य अधिपति: राजा भीष्मक: स्वपुत्रं प्रति अत्यन्तदयापरवश: आसीत्। तदर्थं कन्याया: वररूपेण शिशुपालमियेष। एतस्मिन् अवसरे नगर्य्या: विविधेषु स्थानेषु पुष्पमाध्यमेन तथा नार्य: सुन्दरालङ्कारै: सज्जिता: आसन्। ब्राह्मणा: तस्मिन् समये विविधानां वेदमन्त्राणां पठनं कृत्वा रुक्मिण्या: विवाहार्थं ग्रहशान्तिं कारितवन्त:। राजा भीष्मक: अपि विविधेभ्य: ब्राह्मणेभ्य: भिन्नं भिन्नं द्रव्यं सुवर्णं दत्तवान्। चेदिराज्ञ: दमघोषस्य पुत्र: शिशुपाल: अपि स्वीय विवाहार्थमतीव प्रसन्न: आसीत्। तदर्थं चतुरङ्गीणिसेनां स्वीकृत्य विदर्भदेशाभिमुखे यात्रां कृतवान्। विदर्भराजा भीष्मक: अपि समेषां स्वागतार्थं विविधानि अर्चनानि कृतवान्। शिशुपालेन सह तस्य सहयोगिन: शाल्वजरासन्धदन्तवक्त्रविदूरथपौण्ड्रकादय: महारथिन: आसन्। ते एवं चिन्तितवन्त: यदि द्वारकापति: श्रीकृष्ण: रुक्मिण्या: हरणं निमित्तम् अत्र भविष्यति तर्हि सर्वे तेन सह युद्धं करिष्यन्ति। तदर्थमेते राजान: अपि स्वीयं सैन्यं नीत्वा आगतवन्त:। वलराम: अपि अजानत् यत् श्रीकृष्ण एकाकी कुण्डिनपुरं प्रति गतवान् तदर्थं सोऽप सैन्यानि स्वीकृत्य विदर्भाभिमुखे प्रस्थित:। परमसुन्दरी रुक्मिणी श्रीकृष्णस्य प्रतीक्षारता आसीत्। तस्या: मन: नान्यत्र मग्नीभवति स्म। भगवत: प्रतीक्षां कृत्वा विविधचिन्तनपुर:सरं कालातिपातम् अकार्षीत्। एतत् चिन्तनावसरे तस्या: वामजङ्घ: वामभुज: वामनेत्रं च स्फुरणमभवत्। एतत् श्रीकृष्णस्य आगमनस्य शुभसूचना इति सा अजानत्। तस्मिन् समये श्रीकृष्णं प्रति य: ब्राह्मण: गत: स: पुन: प्रत्यावर्तित: आसीत्। तं दृष्ट्वा रुक्मिण्या: आनन्द: समायात: । तस्य ब्राह्मणस्य लक्षणादेव एषा ज्ञातवती यत् श्रीकृष्ण: आगतवान्। राजा भीष्मक: यदा ज्ञातवान् कन्याया: विवाहं द्रष्टुं कृष्णवलरामौ समाजग्मतु: तदानीं तयो: कृते विविधान् अलङ्कारान् तथा सैन्यानां

कृते स्थानानि कारितवान्। राजा भीष्मकः तस्मिन् समये सर्वेभ्यः इष्टवस्तूनि दत्वा सत्कारं कारितवान्। विदर्भदेशस्य जनाः श्रीकृष्णस्य अगमनसमाचारं श्रुत्वा दर्शनार्थं तं प्रति आजग्मुः। श्रीकृष्णः एव एतस्याः योग्यवरः इति सर्वे कथितवन्तः। श्रीकृष्णः एव रुक्मिण्याः कृते श्रेष्ठवरः इति जुघोष।

रुक्मिणी अपि ससन्यैः सह देव्याः दर्शननिमित्तं मन्दिरं प्रति जगाम। तस्याः सुरक्षार्थं बहवः जनाः नियुक्ताः आसन्। कवचं परिधृत्वा सैन्याः सर्वे रुक्मिण्याः सुरक्षार्थं संयुक्ताः आसन्। बहुविधाः पूजासामग्र्यः धृत्वा सर्वे ब्राह्मणाः अपि तया सह प्रतिजग्मुः। रुक्मिण्या सह विविधाः बृद्धाः अपि आसन्। गिरिजायाः दर्शनं कृत्वा रुक्मिणी बहुविधं पूजार्चनं कृतवती। पूजार्चनादि कर्म समाप्त्यनन्तरं मन्दिरात् बहिः सा समागता आसीत्। ततः रुक्मिण्याः सौन्दर्यवर्णनं शुकदेवेन कृतं वर्तते। रुक्मिण्याः अपूर्वं सौन्दर्यं दृष्ट्वा सर्वे विमोहिताः जाताः । भगवतः प्रतीक्षां कृत्वा तथा मनसि सदासर्वदा चिन्तयामास यत् कदा भगवान् मम हरणं कृत्वा मां स्वीकरिष्यन्ति। यदा राजकुमारी स्वीयरथारूढ़ं भवितुम् इयेष तदानीं सर्वे पश्यन्तः श्रीकृष्णः रुक्मिण्याः हस्तं धृत्वा स्वीयरथोपरि अनयत्। ततः रुक्मिणी श्रीकृष्णस्य गरुडध्वजरथे आरोहणं कृत्वा स्वीयपुरं प्रति नेतुं ययौ। श्रीकृष्णवलरामौ तस्मात् रुक्मिणीं नीत्वा द्वारकां प्रति गन्तुं प्रयासः कारितवन्तौ। तस्मिन् समये सर्वे पश्यन्तः सन्ति परन्तु न कश्चित् किमपि कर्तुं समर्थः आसीत्। केवलं रुक्मिण्याः गमनानन्तरं सर्वे क्रोधान्विताः आसन्। सर्वे परस्परमुखं दृष्ट्वा किं भवति इति चिन्तयामासुः। ततः सर्वेऽपि श्रीकृष्णस्य अनुधावनं कृत्वा स्वरथारूढं भूत्वा अगच्छन्।

बोधप्रश्नः

१. भीष्मकः कस्य राज्यस्य राजा आसीत्?

२. भीष्मकस्य पुत्रस्य नाम किम्?

३. कः रुक्मिणीम् अहरत्?

४. रुक्मिण्याः विवाहार्थं कौ द्वौ आजग्मतुः?

## शिशुपालादीनां पराजयः

यदा श्रीकृष्णः वलरामेण सह ससैन्यं नीत्या रथे रुक्मिण्या सह द्वारकां प्रति प्रस्थानं कर्तुं आरभते तदानीं सर्वे सैन्याः तेषां अनुगमनं चक्रुः। शिशुपालस्य यानि च मित्राणि आसन् तेषां समेषां सैन्याः अपि तेषां पृष्ठतः आसन्। सर्वे मिलित्वा शरवर्षणं चक्रुः। एतादृशं दृष्ट्वा वलरामः अपि स्वीयपराक्रमेण सर्वान् शत्रून् हन्तुं प्रयासं कारितवान्। ससैन्यं सर्वेभ्यः स्वीयमुसलप्रहारेण हत्यां चकार। वलरामादयः यादवाः सर्वेऽपि श्रीकृष्णस्य रक्षार्थं नियुक्ताः आासन्। सर्वे गजारोहिणः अश्वारोहिणः किरीटकुण्डलधारिणः अधः पतिताः आसन्। कस्यचित् मस्तकः विच्छिद्यः आसीत्, कस्यचित् हस्तः कस्यचित् पादः च। तदानीं शिशुपालः अत्यन्तः विमोहितः आसीत्। तं दृष्ट्वा जरासन्धः तं बहु प्रबोधितवान्। पुरुषशार्दुलाः सर्वेऽपि नारीनिमित्तं कदाचिदपि दौर्मनस्यं न भवेयुः। अतः ग्लानिं त्यज। प्रारब्धानुसारं सर्वेभ्यः सर्वं लभ्यते। यत् प्रारब्धे नास्ति तत् कदाचिदपि भवितुं न शक्नोति।

रुक्मिण्याः ज्येष्ठभ्राता श्रीकृष्णस्य द्वेषी आसीत्, यदा सः ज्ञातवान् यत् रुक्मिण्याः हरणमभवत् तदानीं तेषां यादवानां संहारार्थं सः ससैन्यम् आजगाम। तयोः कृष्णवलरामयोः पराक्रमस्य शौर्यस्य अवश्यं नष्टं करिष्यामि इति दृढ़ः सङ्कल्पितः सन् प्रत्यावर्त्तत। यदा रुक्मी भगवता श्रीकृष्णेन योद्धुं समागतः तदानीं श्रीकृष्णस्य बहु भर्त्सनां चकार। ततः संकल्पितरूपेण युद्धं कृतवान्। श्रीकृष्णः अस्य रथस्य ध्वस्तविध्वस्तं चकार। सर्वान् निहत्य श्रीकृष्णः रुक्मिण्याः भ्रातरं यदा मारणार्थं प्रयत्नं चकार तदानीं रुक्मिणी तस्याः अग्रजस्य जीवनदाननिमित्तं प्रार्थनां कृतवती। ततः दयापरवशः सन् अच्युतः तस्य हननं न अकार्षीत्। केवलं श्मश्रवादीनां कर्तनं कृत्वा कुरूपं कृत्वा त्यक्तवान्। ततः वलरामः रुक्मिणीं प्रति स्वकर्मणः फलं मानवः अवश्यं भोगं करिष्यति तथा विविधानां पापानां फलं मानवः अवश्यं भुंक्ते इति प्रतिपादितवान्। क्षत्रियधर्मस्य पालनं सर्वैः क्षत्रियैः अवश्यं करणीयमिति प्रबोधयामास। ततः स्वजनानां वधमपि यदि क्रियते तर्हि क्षत्रियस्य धर्महानिः न भविष्यति। सर्वे यादवाः सर्वान् निहत्य रुक्मिण्याः सह द्वारकापुरीं प्रति समागताः वर्तन्ते। द्वारकायां श्रीकृष्णस्य प्रति सर्वेषाम् अगाधप्रेमभावना आसीत्। श्रीकृष्णेन सह रुक्मिण्याः आगमनस्य सम्वादं श्रुत्वा सर्वेऽपि द्वारकावासिनः प्रसन्नमनसा नृत्यं चक्रुः। रुक्मिण्याः विवाहावसरे सर्वेऽपि यादवाः प्रसन्नमनसा गृहे गृहे आनन्दिताः आसन्। सर्वत्र शङ्खध्वनेः तथा विविधानां अभूषणानां मूर्च्छनायां

द्वारकापुरी मुखरिता आसीत्। एतस्य रुक्मिणीहरणस्य वर्णनं पुरे पुरे प्रतिध्वनितम् अभवत्। सर्वेऽपि द्वारकाया: मित्रदेशाधिपतय: समागता: आसन्। द्वारकाया: प्रत्येकऽस्मिन् स्थाने जना: आनन्देन मग्ना: आसन्। भगवती रुक्मिणी अपि लक्ष्म्या: अवतारभूता आसीत्। तदर्थं सर्वेऽपि जना: उत्सवे योगदानं चक्रु:।

बोधप्रश्न:

१. शिशुपाल: कस्य देशस्य राजा आसीत्?

२. रुक्मिणी कस्या: अवताररूपेण अवतीर्णा आसीत्?

३. शिशुपालं क: प्रबोधयामास?

**प्रद्युम्नस्य जन्म –**

श्रीकृष्णेन सह रुक्मिण्या: विवाह: द्वारकायामभवत्। तस्मात् रुक्मिण्या: एक: पुत्र: जज्ञे। एष: पुत्र: पूर्वजन्मनि भगवत: शिवस्य क्रोधाग्निना भस्मीभूतो बभूव। भगवत: अंशरूपेण अयं जनिं लेभे। श्रीकृष्णस्य औरसादेव अस्य पुत्रस्य जन्म अभूत्। एष: पुत्र: प्रद्युम्न: इति नाम्ना लोके प्रथितो जात:। अस्य जन्मनादनन्तरं शम्वरासुर: ज्ञातवान् यत् श्रीकृष्णस्य गृहे तस्य परमशत्रो: जन्म अभूत्। य: पुत्र: तस्य विनाशस्य कारणं भविष्यति। अत: श्रीकृष्णस्य अन्त:पुरे प्रवेशं कृत्वा तस्य पुत्रस्य हरणं कर्तुं प्रयत्नं चकार। स: पुत्र: सौन्दर्यवीर्यसुशीलतायां श्रीकृष्णसदृश: आसीत्। तत: शम्वरासुर: तं प्रद्युम्नमपहृत्य समुद्रे अक्षिपत्। तस्य क्षेपणानन्तरं एक: विशाल: मत्स्य: तं शिशुम् अखादत्। कश्चिदेक: धीवर: तं मत्स्यं नीत्वा स्वगृहमागत्य शम्वरासुरं प्रति गत्वा उपहाररूपेण अयाचत्। तत: पाकशालायां तस्य च्छेदनसमये तस्य पुत्रस्य आविर्भाव: अभूत्। शम्वरासुरस्य पत्नी आसीत् मायावती, या च पूर्वजन्मनि रतिदेवी रूपेण ख्याता आसीत्। अस्या: मायावत्या: सन्देह: समुपजात: यत् कथमेतस्य मत्सस्य शरीरे अस्य पुत्रस्य जन्म अभूत्। तदानीं नारद: तं प्रति समागत्य एष: पूर्वजन्मनि भवत: स्वामी कामदेव: आसीत् इति प्रत्यपादयत्।

मायावती एतस्य शिशो: जन्मरहस्यं श्रुत्वा तं प्रति अशेषप्रेम्णा यथोचित सम्मानं चकार। अतीवाल्पसमये प्रद्युम्न: युवकावस्थायाम् उपनीत: समायात:। स: प्रद्युम्न: एतादृश: आसीत्, यस्य दर्शनादनन्तरं सर्वा: स्त्रिय: कामासक्ता: अभूवन्। तस्य प्रद्युम्नस्य प्रलम्ववाहुं तथा पद्मदलायतेक्षणं नेत्रं दृष्ट्वा सर्वे आकृष्टा: जाता:। सर्वा स्त्रिय: तस्य प्रद्युम्नस्य शुश्रुसां कृत्वा स्वीयकामभावं प्रकटितवत्य:। यदा प्रद्युम्न: युवकावस्थायामासीत् कदाचित् मायावती तस्य पुरतो गत्वा सर्वं रहस्यं श्रावितवती। जन्मन: दशदिनानन्तरं तस्य हरणं कृत्वा शम्वरासुर: समुद्रमध्ये अक्षिपदिति प्रत्यपादयत्। मायावती पूर्वजन्मन: रहस्यं कथयामास। मायावती प्रद्युम्नाय महामाया नाम्नी मायां प्रोवाच।

बोधप्रश्न:

१. प्रद्युम्नस्य मातु: नाम किम्?

२. क: प्रद्युम्नम् अहरत?

३. शम्वरासुरस्य पत्नी का आसीत्?

## शम्वराशुरस्य वध:

सर्वं सरहस्यं श्रुत्वा प्रद्युम्न: सकलं विषयं अजानत्। एतच्छुत्वा प्रद्युम्न: मयावत्या: सकाशात् सर्वा: विद्या: शिक्षितवान्। तया विद्यया शम्वरासुरेण सह योद्धुं प्रतिपस्थित: । शम्वरासुर: अतीव मायावी आसीत्। मायाया: प्रभावेन स: शम्वरासुर: अतीव उपरि गत्वा तेन प्रद्युम्नेन सह युद्धं चकार। विविधानामस्त्रशस्त्राणां वर्षणं शम्वरासुर: अकार्षीत्। शम्वरासुर: यक्षगन्धर्वपिशाचनागराक्षसादीनां मायां प्ररोच्य प्रद्युम्नस्य हननार्थं चेष्टां कृतवान्। तत: महायुद्धस्य परिणामस्वरूपं शम्वरासुरस्य मस्तकं प्रद्युम्न: एकेन तीरेण च्छेदनं कृतवान्। तत: शम्वरासुर: मृतो जात:।

तस्य मरणानन्तरं प्रद्युम्नः मायावत्या सह विवाहं कृत्वा स्वपितृगृहं द्वारकापुरीं प्रति आजगाम। मायावती अपि तेन सह आसीत्। तदानीं नारदः समागत्य तस्य प्रद्युम्नस्य हरणविषयः समुपपादितः। एतस्य श्रवणादेव सर्वेषां मनसि बहु आनन्दः समागतो वर्तते।

बोधप्रश्नः

१. प्रद्युम्नः पूर्वजन्मनि कः आसीत्?

२. कः कामदेवं शशाप?

३. कः प्रद्युम्नः श्रीकृष्णस्य पुत्रः इति कथयामास?

**सारांश: –**

अध्यायेऽस्मिन् विविधानां विवाहानां चित्रणं विहितं वर्तते। रुक्मिण्या: हरणानन्तरं तया सह भगवत: परिणय: समुपवर्णितो दृश्यते। एतेन साकं जरासन्धस्य पराजय: अन्येषां शिशुपालादीनां पराजय: तथा यादवै: शत्रुसंहारविषय: विहितो वर्तते। पुन: रुक्मिण्या: अग्रजस्य पराजय: प्रतिपादित:। रुक्मिण्या: पुत्रस्य प्रद्युम्नस्य जन्मरहस्यं तथा तस्य जन्मन: दशदिनानन्तरं शम्वरासुरेण क्षेपणचरितं चित्रितं वर्तते। अस्मिन् अध्याये शम्वरासुरेण रक्षितस्य श्रीकृष्णपुत्रस्य मायावत्या: सह परिणय: तथा शम्वरासुरस्य वध: उपन्यस्त:। अस्मिन् अध्याये पुन: प्रद्युम्नस्य द्वारकां प्रति आगमनं तथा नारदश्रीकृष्णयो: कथोपकथनमाध्यमेन समुद्रे क्षिप्तस्य प्रद्युम्नस्य धीवरेण स्वीकृतविषय: प्रतिपाद्यते। शम्वरासुरस्य पाकशालायां सुन्दररूपयुक्तस्य प्रद्युम्नस्य यौवनावस्थाया: चित्रणं, प्रतिपादितस्य अध्यायस्य महत्त्वं वर्धयति।

# आदर्शप्रश्ना:

## लघूत्तरीयप्रश्ना:

१. रुक्मिण्या: अग्रजस्य पराजय:।

२. द्वारकां प्रति प्रद्युम्नस्य पुनरागमनम्।

३. मायावत्या: पूर्वजन्मरहस्यम्।

## विश्लेषणात्मकप्रश्ना:

१. शिशुपालादीनां पराजयं लिखत।

२. रुक्मिण्या: विवाहं विशदयत।

## निबन्धात्मकप्रश्ना:

१. शम्वरासुरस्य संहारं विशदयत।

२. प्रह्लादस्य जन्मरहस्यं वर्णयत।

३. रुक्मिण्या: हरणं स्पष्टयत।

## एकाङ्कप्रश्ना:

१. क: रुक्मिणी हरणं चकार?

२. भीष्मकस्य पुत्री का आसीत्?

३. रुक्मिणी कस्य देशस्य राजकन्या आसीत्?

४. शिशुपालं क: प्रबोधयामास?

५. शिशुपाल: कस्य देशस्य नरेश: आसीत्?

६. रुक्मिण्या: पुत्र: क:?

७. कामदेवं क: भस्मीकृतवान्?

८. प्रद्युम्नं क: अहरत्?

९. मायावती का आसीत्?

१०. प्रद्युम्नः कस्मिन् कार्ये नियुक्तः आसीत्?

११. प्रद्युम्नः श्रीकृष्णस्य पुत्रः इति कः कथयामास?

१२. रुक्मी कः आसीत्?

१३. योगेश्वरः कः?

१४. कुण्डिनपुरस्य कुलदेवी का?

१५. श्रीकृष्णस्य शङ्खस्य नाम किम्?

## उत्तराणि

१. श्रीकृष्णः २. रुक्मिणी ३. कुण्डिनपुरस्य ४. जरासन्धः ५. चेदी ६. प्रद्युम्नः

७. शिवः ८. शम्वरासुरः ९. रतिदेवी १०. पाककार्ये ११. नारदः

१२. भीष्मकपुत्रः १३. श्रीकृष्णः १४. गिरिजा १५. पाञ्चजन्यः

# तृतीयोऽध्यायः

## प्रस्तावना

अस्मिन् अध्याये विविधाः महत्त्वपूर्णविषयाः दरीदृश्यन्ते। पूर्वस्मिन् अध्याये प्रद्युम्नस्य चरितं संक्षेपेण विहितं वर्तते। विविधेषु पुराणेषु गुह्यरूपेणापि समानविषयाणामुपरि विचारः प्रस्तुतः वर्तते। स्यमन्तकमणिविषयः विविधेषु पुराणेषु महाभारते च वर्णितो विद्यते। अस्य स्यमन्तकस्य महत्त्वमत्र प्रतिपादितं वर्तते। स्यमन्तकमणि साधारणमणि नासीत्। स्यमन्तकस्य प्रभावेण राज्ये कदाचिदपि दुर्भिक्षः महामारी अकालमृत्युरित्यादयः विविधाः समस्याः नासीत्। भल्लुकराजः जाम्ववान् स्यमन्तकं स्वीकृत्य स्वपर्वतकोटरे क्रीडनकरूपेण अस्थापयत्। परन्तु भगवान् श्रीकृष्णः बहु अन्वेषणं कृत्वा पर्वतकोटरे प्रविष्टवान्। ततः जाम्ववतीं स्वीकृत्य द्वारकां प्रति स्यमन्तकेन सह समायातः। पुनः सत्राजितस्य कन्यया सह श्रीकृष्णस्य विवाहोऽपि अभूत्। एतेषामुपरि अत्र चर्चा विधीयते।

## उद्देश्यम्

अस्मिन् अध्याये सर्वे पाठकाः अधोलिखितान् विन्दून् ज्ञास्यन्ति।

- स्यमन्तकमणि वर्णनम्
- सत्यभामाजाम्ववत्योः परिणयः
- शतधन्वनः वधः
- अक्रूरस्य आगमनम्
- श्रीकृष्णस्य विवाहः

## स्यमन्तकमणिवर्णनम्

कदाचित् सत्राजितः नाम्ना कश्चित् परमधार्मिकः सूर्योपासकः भक्तप्रवरः आसीत्। सः अनन्यभक्त्या सूर्यस्योपासनां चकार। तस्य उपसनायां सन्तुष्टः सूर्यः तस्मै स्यमन्तकमणिं उपहारस्वरूपेण ददौ। तस्य स्यमन्तकस्य प्रभावेन अकालमहामारी,दुर्भिक्षः, ग्रहपीडा, सर्पभयः, मानसिकशारीरिकव्याधिः अपि न कदाचिदपि भविष्यति। पुनः एतस्य परिधानेन सूर्यतुल्यकान्तिः शरीरस्य भविष्यति। एतत् स्यमन्तकं परिधृत्वा सत्राजितः कदाचित् द्वारकां प्रति आजगाम। तं दृष्ट्वा सर्वे जनाः साक्षात् सूर्यः समुपागतः इति मन्यमानाः सन्तः श्रीकृष्णं प्रति जग्मुः। श्रीकृष्णः अस्य स्यमन्तकस्य प्रभावोऽयमिति अवादीत्। ततः सत्राजितस्य आगमनेन द्वारकायां सर्वे जनाः आनन्दोत्सवेन मग्नाः अभूवन्। सः स्यमन्तकः प्रतिदिनमष्टभारं स्वर्णं सृजति। यस्मिन् च राज्ये सः स्यमन्तकः भविष्यति तस्मिन् कदापि दुर्भिक्षः न भविष्यति। कदाचित् भगवान् श्रीकृष्णः तं स्यमन्तकं उग्रसेनाय दातुं सत्राजितं कथयामास। परन्तु सत्राजितः कदाचिदपि तां मणिं न कस्मैचित् दातुं प्रयतते स्म। पुनः एकस्मिन् समये सत्राजितस्य भ्राता प्रसेन तं स्यमन्तकं कण्ठे प्रतिमुच्य वने मृगयानिमित्तं व्यचरत्। तस्मिन् वने कश्चित् सिंहः तं हत्वा स्यमन्तकं नीत्वा गिरिकन्दरे प्राविशत्। ततः कश्चित् भल्लुकराजः जाम्ववान् तं सिंहं हत्वा मणिं स्वीकृत्य स्व पुत्र्यैः क्रीडनकार्थं समर्पितवान्। सत्राजितः प्रसेनस्य वनाद् नागमनं दृष्ट्वा चिन्तयामास यत् कदाचित् श्रीकृष्णः प्रसेनं हत्वा मणिम् अनयत्। ततः जनाः अपि एतस्मिन् विषये बहु वार्तालपं कृतवन्तः। श्रीकृष्णः एव एतस्य प्रसेनस्य हत्यां कृत्वा मणिं स्वीकृतवान् इति कर्णे कर्णे जनाः जपन्तः आसन्। श्रीकृष्णः अपि अस्मिन् विषये ज्ञातवान्। ततः आत्मनि लिप्तं कलङ्कम् उपश्रुत्य वनं प्रति जगाम। तेन सह केचन जनाः अपि आसन्। यदा सर्वे प्रसेनम् अपश्यन् सः सिंहेन हतः इति अपश्यन्।

श्रीकृष्णः तस्य सिंहस्य पादचिह्नानि दृष्ट्वा तं गिरिकन्दरं प्रति जगाम। तेन सह तदानीं न कोऽपि आसीत्। तान् प्रति श्रीकृष्णः उवाच यत् यदि बहुसमयं यावत् तस्मात् गिरिगृहात् अहं नागमिष्यामि तर्हि भवन्तः सर्वेऽपि गृहं प्रति गमिष्यन्ति। ततः बहुसमयं यावत् श्रीकृष्णस्य प्रत्यावर्त्तनं नाभवत्। सर्वे द्वारकावासिनः क्रन्दनं चक्रुः। अन्तेवासिनः सर्वेऽपि स्त्रियः भगवतः दुःखेन संलग्नाः अभूवन्। श्रीकृष्णः तस्मिन् गिरिकोटरे स्यमन्तकं धृत्वा क्रीडन्तं ददर्श। ततः श्रीकृष्णः जाम्ववता सह युद्धं कृत्वा स्यमन्तकं स्वीकृत्य द्वारकां प्रत्यावर्तितः ।

बोधप्रश्न:

१. क: सूर्यात् मणिं प्राप्तवान्?

२. सिंहेन क: मारित: ?

३. अष्टभारं सुवर्णं क: ददाति?

**सत्यभामाजाम्ववत्यो: श्रीकृष्णेन सह विवाह: –**

भगवान् श्रीकृष्ण: गिरिकन्दरे मणिम् आहर्तुं प्राविवेश। परन्तु तस्मिन् गिरिकन्दरे क्रीडनकरूपेण तं स्यमन्तकं स्वीकर्तुं याचितवान्। तत: भल्लुकराज: न दातुं प्रोवाच। पुन: भगवान् श्रीकृष्ण: अस्य स्यमन्तकस्य विषयं श्रावयित्वा तं प्राप्तुं पुन: कथयामास। परन्तु जाम्ववान् तं दातुं नाङ्गीकृतवान्। अत: मल्लयुद्ध: अभवत्। तस्मिन् युद्धे जाम्ववान् प्रतिहत: जात: । परन्तु तस्य पराजयं न कदाचिदपि भविष्यति इति स: स्मारितवान्। भगवता रामेण सह कदाचित् प्रतियोद्धुं मनसि विचिकित्सा भल्लुकराजस्य आसीत्। परन्तु पितासदृश: जाम्ववान् इति विचिन्त्य तेन सह युद्धं न चकार। तस्मै कथयामास द्वापरयुगे कदाचित् श्रीकृष्णावतारे भवता सह अवश्यं युद्ध: भविष्यति। अत: श्रीकृष्णमतिरिच्य न केनापि भवान् प्रतिहतो न भविष्यति। तर्हि भवान् क: इति पप्रच्छ। तदानीं भगवान् श्रीकृष्ण: एतस्मै सर्वं कथयामास। तत: स एव पुराणपुरुषोत्तम: भगवान् विष्णु: परमप्रतापी श्रीरम: एक: एव इति ज्ञातवान्। मणिप्राप्तये गह्वरं प्रति समागतोऽहमिति श्रीकृष्ण: प्रोवाच। तत: जाम्ववान् आनन्देन तं स्यमन्तकं श्रीकृष्णाय दत्तवान्।

स्यमन्तकेन सह जाम्ववत: कन्याया: अपि समर्पणं भगवत: चरणकमले प्रत्यर्पितवान्। तत: तया सह भगवान् द्वारकां प्रति आजगाम। अनया कन्यया सह श्रीकृष्ण: विवाहं कृत्वा द्वादशदिनानन्तरं स्यमन्तकमणिं स्वीकृत्य द्वारकां प्रति अगमत्। तत: सर्वं रहस्यं श्रीकृष्ण: सत्राजितं तथा उग्रसेनं च कथयामास। तत: सत्राजित:

लज्जितोऽभवत्। ततः केनोपायेन अस्य निवारणं करिष्यामि इति मनसि विचिन्तयन् श्रीकृष्णाय मणिं प्रत्यर्पयामि इति चिन्तयामास। सत्राजितः भगवतः चरणकमले प्रार्थितवान् यत् अहं दोषमाचरितवान्। अस्य दोषस्य निवारणमहमेव करिष्यामि। मम कन्यायाः विवाह भवता सह अहं कर्तुमिच्छामि। तया सह एनं स्यमन्तकं भवते ददामि। परन्तु श्रीकृष्णः एनं स्यमन्तकं स्वीकर्तुं नाङ्गीकृतवान्। भगवान् सत्यभामया सह परिणयं चकार। परन्तु तस्य स्यमन्तकस्य ग्रहणार्थं नाङ्गीकृतवान्। अतः सः स्यमन्तकः सर्वदा भवतः पार्श्वे भवतु। परन्तु तस्मादागतस्य सुवर्णस्य वयं फलभागिनः भवामः। अतः एवंरूपेण स्यमन्तकहेतोः जाम्ववत्या सह तथा सत्यभामया सह भगवतः श्रीकृष्णस्य विवाहः बभूव।

बोधप्रश्नः

१. भल्लुकराजः कः ?

२. पर्वतकोटरं प्रति कः जगाम ?

३. सिंहं कः हतवान् ?

## शतधन्वनः वधः

कदाचित् एवं प्रथितो जातः यत् पाण्डवाः यतुगृहे दग्धाः अभूवन्। एतच्छ्रुत्वा कृष्णवलरामौ अभ्यर्थनार्थं हस्तिनापुरं प्रति जग्मतुः। ततः बहुसमवेदनां ज्ञापितवन्तौ। एतस्मिन् अवसरे कदाचित् द्वारकायाम् अक्रूरकृतवर्माणौ शतधन्वानम् ऊचतुः यत् अस्मिन् समये स्यमन्तकं भवान् प्रतिगृह्णीयात्। यतोहि सत्यभामायाः विवाहः भवता सह भविष्यति इति पूर्वं सत्राजितः कथयामास। परन्तु तस्मात् विरतः अभवत्। अतः भवता स्यमन्तकः किमर्थं न गृह्यते। इति प्रबोधयामासतुः। ततः शतधन्वा एकस्मिन् समये यदा सत्राजितः शयने रताः अभवत् तदानीं तं प्रतिहत्वा मणिं स्वीकृत्य जगाम। सत्राजितस्य हननानन्तरं सत्यभामा बहुरोदनं चकार। पुनः गृहे सर्वे दुःखिताः अभूवन्। ततः सत्यभामा हस्तिनापुरे तिष्ठन्तं श्रीकृष्णं प्रति गत्वा सर्वं कथयामास। ततः श्रीकृष्णः बहुदुःखेन द्वारकां प्रति आजगाम।

ततः श्रीकृष्णः शतधन्वनः संहारार्थम् उपायः चिन्तयामास। एतच्छ्रुत्वा शतधन्वा सर्वादौ कृतवर्माणं प्रति गत्वा न्यवेदयत्। ततः कृतवर्मा तं सहायं कर्तुं नाङ्गीकृतवान्। सः प्रोवाच, जगतः सकलशक्तेः आधारभूतः श्रीकृष्णः, तेन सह प्रतियोद्धुं न मम सामर्थ्यः वर्तते। अतः कथमहं प्रतियोत्स्यामि। अस्मिन् लोके न कोऽपि विद्यते यः ताभ्यां सह योद्धुं समर्थः। जरासन्धशिशुपालादीनां का गतिः अभूत् एतस्मिन् विषये तु भवान् सर्वं जानाति अतः किं वा वक्तुं समर्थोऽहं। अतः किमपि कर्तुं न शक्नोम्यहम्। ततः अक्रूरं प्रति शतधन्वा जगाम। तत्र गत्वा तस्य सविधे रक्षानिमित्तं याचितवान्। पुनः अक्रूरः अपि त्रिलोकनाथस्य भगवतः श्रीकृष्णस्य विषये तथा तस्य रहस्यं कथयामास। तदानीं तं स्यमन्तकं तत्र संस्थाप्य शतधन्वा तस्मात् प्रतिजगाम। अक्रूरात् नैराश्यात्मकमुत्तरं श्रुत्वा शतधन्वा एकस्मिन् अश्वे उपविश्य वनं प्रति जगाम। श्रीकृष्णवलरामौ अपि अतीवद्रुतगत्या तस्य शतधन्वानः अनुगमनं चक्रतुः। ततः बहुदूरगमनानन्तरं तस्य अश्वः अधः पतितः। ततः सोऽपि अधः अपतत्। ततः घोटकं विसृज्य अतिवेगेन अधावत्। ततः भगवान् स्वीयचक्रेण तस्य शिरच्छेदनं चकार। तं प्रति गत्वा ददर्श यत् एतस्य पाश्वे मणि नास्ति। ततः बहु अन्वेषणं द्वावपि भ्रातरौ कृतवन्तौ। परन्तुं स्यमन्तकं न संप्राप्य गृहं प्रस्थितौ।

बोधप्रश्नः

१. कः सत्राजितं हत्वा मणिं स्वीकृतवान्?

२. शतधन्वानं कः अहनत्?

३. कौ द्वौ शतधन्वानं प्ररोचयामासतुः?

### अक्रूरस्य पुनः द्वारकागमनम् –

शतधन्वानः संहारानन्तरं भयेन अक्रूरकृतवर्माणौ द्वारकातः प्रस्थितौ। अतः यदा श्रीकृष्णः तस्मात् वनात् शतधन्वानः वधं कृत्वा द्वारकापुरीं प्रति आजगाम तदानीं तस्य पार्श्वे मणिः नासीदिति प्रोवाच। अतः कस्य पाश्वे मणिः विद्यते इति बहु अन्वेषणं चकार। ततः एतस्मिन् समये द्वौ पलायितौ। अक्रूरस्य गमनादनन्तरं राज्ये महामारी,

दुर्भिक्षादि बहुगुणितमभवत्। सर्वे जना: तत: अक्रूरस्य गमनानन्तरमेवमभूत् इति कथयामास। कदाचित् काशीराज्ये वर्षा: न अभवन्। तत: तत्रागतेन श्वफल्केन सह गान्दिन्या: विवाहानन्तरं तस्मिन् राज्ये वर्षा: अभूवन्। श्वफल्कस्य पुत्र: अक्रूर:। अत: पितु: सदृश: पुत्रस्य महिमा वर्तते। अत: अक्रूर: यत्र स्थास्यति तत्र एतानि कार्याणि न भवन्ति। एतच्छ्रुत्वा भगवान् श्रीकृष्ण: अक्रूरं द्वारकां प्रति समाहूतवान्। तत्र अक्रूरस्य अभ्यर्थनां कृत्वा सादरेण भोजनादि दत्वा मणिविषयकं विचार: कृतो वर्तते। श्रीकृष्ण: स्मयमान: उवाच शतधन्वा भवत: पार्श्वे मणिं संस्थाप्य वनं गतवान्। सत्राजितस्य पुत्राभावात् तस्य दुहितु: सुता: एव तस्य तिलदानादिकर्माणि करिष्यन्ति। अत: तस्मिन् स्यमन्तके तस्य सुतस्य अधिकारो वर्तते। भवानपि तस्य स्यमन्तकस्य प्रभावेन यावन्ति सुवर्णानि भवन्ति तेन यज्ञादीनाम् आचरणं करोति। अत: एतत् बहु उत्तमकार्यम्। राज्ये शान्तिस्थापनार्थं तेन सह भवान् अत्र निवसतु। स: स्यमन्तक: भवत: पार्श्वे सर्वदा भविष्यति अत: तत् सर्वेभ्य: दर्शयित्वा भवान् स्थापयतु इति भगवान् प्रोवाच। अत: तं स्यमन्तकं सर्वेभ्यो दर्शयित्वा अक्रूर: अनयत्।

बोधप्रश्न:

१. अक्रूरस्य पिता क: ?

२. स्यमन्तके कस्य अधीकारो विद्यते ?

### श्रीकृष्णस्य कालिन्द्या सह विवाह: –

यतुगृहस्य दहनानन्तरं सर्वेऽपि पाण्डवा: मृता: इति प्रचार: आसीत्। परन्तु भगवत: श्रीकृष्णस्य अपारकरुणया ते सर्वेऽपि पाण्डवा: जीविता: आसन्। तत: तेषां पाण्डवानां दर्शनार्थं भगवान् श्रीकृष्ण: तथा अन्ये सर्वेऽपि यादवा: भगवता सह प्रतस्थिरे। युधिष्ठिरस्य अभिवादनं साक्षात् भगवान् श्रीकृष्ण: कृतवान्। अन्येषां पाण्डवानां मार्मीकविषयस्य रहस्यं ज्ञातवान्। तस्मिन् समये सर्वेऽपि पाण्डवा: इन्द्रप्रस्थे आसन्। तस्मिन् इन्द्रप्रस्थे एव भगवान् श्रीकृष्ण: सर्वेभ्य: दर्शनं दत्तवान्। कुन्त्या: दु:खदुर्दशां ज्ञात्वा समुचितमार्गं प्रदर्शितवान्। तत: अर्जुनेन सह

खाण्डववनस्य ध्वंसनिमित्तं ततः प्रतिजगाम। युधिष्ठिरः श्रीकृष्णं प्रति प्रोवाच अस्मिन् जन्मनि उतवा पूर्वजन्मनि मनुष्यस्य पुण्यफलेन भवतः दर्शनं लभ्यते। भवान् पुराणपुरुषोत्तमः सर्वदेवाधिदेवः परमस्वरूपः सच्चिदानन्दः।

कदाचित् अर्जुनेन सह भगवान् श्रीकृष्णः वने हिंस्रजन्तूनां संहारार्थं प्राविवेश। ततः सर्वान् हिंस्रपशून् हत्यां कृत्वा ये पशवः यज्ञकार्यस्य सिद्धये सहायकाः भवन्ति तान् प्रेषितवान्। पुनः अरण्ये अर्जुनेन सह विहारं कृतवान्। अर्जुनः भगवतः श्रीकृष्णस्य परमसखा वर्तते। तेन सह सर्वदा श्रीकृष्णः तिष्ठति। अर्जुनं समुचितमार्गं प्रदर्शयति। शरीरगतक्लान्तिम् अपशमनार्थं यमुनानद्याः जलं पीत्वा पिपासायाः निवारणं द्वावपि कृतवन्तौ। तत्र काचित् सुन्दरी कन्या तपः आचरति स्म। तस्याः कन्यायाः तपः दृष्ट्वा अर्जुनं प्रति सा का इति प्रष्टुं श्रीकृष्णः प्रोवाच। अतः अर्जुनः तां कन्यां प्रति गत्वा श्रीकृष्णेन यत् कथयामास तद्विषये पप्रच्छ। सा कन्या अतीव सुन्दरी रूपलावण्यवती आसीत्। सा कन्या कथयामास सा सूर्यदेवस्य कन्या। तस्याः नाम कालिन्दी। कालिन्दी भगवन्तं श्रीकृष्णं वररूपेणं प्राप्तुं अत्र कठिनतपः आचरति स्म। सा कन्या कृष्णमतिरिच्य न अन्यं वररूपेण ययाचे। परमपुरुषोत्तमः श्रीकृष्णः परमपुरुषः अतः तं पतिरूपेण ययाचे। पिता सूर्यदेवः कन्यायाः निवासार्थं यमुनानद्याः कुले एकस्य गृहस्य निर्माणमपि अकार्षीत्। अतः तस्मिन् गृहे अहं तिष्ठामि। यावत् पर्यन्तं भगवतः दर्शनं न लभ्यते तावत् पर्यन्तं इतः कुत्रापि न गमिष्यामि इति उवाच। ततः एतानि रहस्यानि अर्जुनः श्रीकृष्णं प्रति गत्वा कथयामास। ततः श्रीकृष्णः तां कन्यां दर्शनं दत्वा विवाहं च कृत्वा रथारुह्य आजगाम।

बोधप्रश्नः

१. कालिन्दी कस्य कन्या वर्त्तते ?

२. श्रीकृष्णेन सह वनं प्रति कः जगाम ?

३. का वने तपसा मग्ना आसीत् ?

**श्रीकृष्णस्य विवाहाः –**

समेषाम् अनुमतिं स्वीकृत्य श्रीकृष्णः सात्यक्यादिभिः सह द्वारकां प्रत्यावर्तितः। द्वारकायां कालन्द्या सह श्रीकृष्णस्य विवाहः वैदिकरीत्या अभूत्। तस्मिन् समये अवन्त्याः नरेशः विन्दानुविन्दौ आस्ताताम्। तयोः द्वयोः भगिनी मित्रविन्दा आसीत्। सा अपि भगवतः परमभक्ता आसीत्। तस्याः अपि अभिलाषा श्रीकृष्णेन सह परिणेतुं आसीत्। विन्दानुविन्दौ द्वावपि श्रीकृष्णस्य द्वेषिणौ आस्ताताम्। तयोः इच्छा अनुरागः दुर्योधनं प्रति आसीत्। अतः मित्रविन्दायाः विवाह दुर्योधनेन सह कर्तुम् इयेष। तदानीं श्रीकृष्णः वलपूर्वकं मित्रविन्दायाः अपहरणं कृत्वा तया सह विवाहं कृतवान्। सर्वे अन्ये राजानः केवलं द्रष्टारूपेण आसन्।

कोसलदेशस्य राजा आसीत् परमधार्मिकः भक्तप्रवरः। तस्य राज्ञः परमसुन्दरी कन्या आसीत् सत्या। सा कन्या नग्नजितस्य कन्यात्वात् तस्याः नाम अपि नग्नजिता आसीत्। तस्य राज्ञः प्रतिज्ञा आसीत् यत् यः तस्य दुर्द्धर्षान् खलान्  सप्तगोवृषान् जित्वा वोढुं समर्थः तेन सह कन्यायाः विवाहः भविष्यति। कदाचित् भगवान् श्रीकृष्णः तस्मिन् राज्ये प्राविवेश। तस्याः कन्यायाः चित्तं श्रीकृष्णं पतिरूपेणं प्राप्तुम् इयेष। तदानीं भगवान् श्रीकृष्णः सत्याः विवाहः तेन सह कर्तुं सम्बन्धः समुपस्थापितः। परन्तु नग्नजितः बोधयामास हे भगवन् मम पूर्वमेव सङ्कल्पः आसीत् यत् एतान् गोबृषभान् यः वन्धनं कृत्वा स्थापयिष्यति सः मम कन्यायाः योग्यः वरः। अतः केनचित् मम प्रतिज्ञायाः अवमाननं न स्यात्। भगवान् श्रीकृष्णः अस्य कथोपकथनं श्रुत्वा साक्षात् सप्तभिः रूपैः सप्तगोवृषभान् वन्धनं चकार। ततः नग्नजितायाः परिणयः श्रीकृष्णेन सह बभूव। विवाहानन्तरं नग्नजितः बहुधनं श्रीकृष्णाय ददौ। ततः सर्वं स्वीकृत्य श्रीकृष्णः द्वारकापुरीं प्रति ययौ। अर्जुनः श्रीकृष्णस्य सहायम् आगमनमार्गे कृतवान्। ये च शत्रवः सत्यां पत्नीरूपेणं प्राप्तुं चिन्तयामासुः तेषां समेषां दमनं कृत्वा अर्जुनः स्वीयगाण्डिवेन तान् प्रतिहतं चकार।

केकयदेशे एका कन्या आसीत् यस्याः कन्यायः नाम भद्रा आसीत्। भद्रायाः भ्राता सन्तर्द्दनः स्वतः प्रवृत्तरूपेण श्रीकृष्णाय भद्रां दत्तवान्। ततः तस्याः सह अपि भगवान् श्रीकृष्णःविवाहं चकार। पुनः मद्रप्रदेशस्य राज्ञः एका कन्या आसीत् यस्याः नाम लक्ष्मणा। यथा गरुडस्वर्गात् अमृतस्य अपहरणं चकार तथैव सः श्रीकृष्णः तस्याः कन्यायाः अपहरणं कृत्वा स्वीकृतवान्। भगवतः भार्याः बहव्यः सन्ति। यासां गणना कृत्वा एकैकं वक्तुं न शक्यते। अतः एतादृशरूपेण भगवतः श्रीकृष्णस्य विवाहः भिन्न भिन्न रूपेण अभूत्।

बोधप्रश्न:

१. सत्या कस्य देशस्य राजकन्या आसीत्?

२. मित्रविन्दाया: विवाह केन सह अभूत्?

३. भद्राया: भ्राता क: ?

४. अवन्ती कन्या का?

## सारांश: –

अध्यायेऽस्मिन् सत्राजितस्य सूर्यसकाशात् लब्ध: स्यमन्तक: समुपवर्णित:। एतस्य स्यमन्तकस्य महत्ता प्रतिपादिता वर्तते। अयं स्यमन्तक: प्रत्यहम् अष्टभारं सुवर्णं ददाति। एतस्य सकाशात् कदाचिदपि दुर्भिक्ष: न भवति। महामारी अकालरोगव्याधि: न भविष्यति। पुन: शतधन्वान: वध: प्रतिपद्यते। स्यमन्तकं स्वीकृत्य सत्राजितं हत्वा एष: गोपने पलायनं चकार। परन्तु कश्चिदपि एतस्य सहायं न चकार। परिशेषेन श्रीकृष्ण: एतस्य वधं कृतवान्। तत: श्रीकृष्णस्य विवाहादिविषया: प्रतिपाद्यन्ते। अस्मिन् अध्याये पाण्डवै: सह वार्ता विहिता दृश्यते। तत: अर्जुनेन सह वनविहार: तथा कालन्द्या सह कथोपकथनं प्रतिपादितं दृश्यते। श्रीकृष्णेन सह सत्याया: भद्राया: लक्ष्मणाया: विवाह: समुपवर्णित: वर्तते।

## आदर्शप्रश्नाः

### लघूत्तरीयप्रश्नाः

१. कालन्द्या सह भगवतः विवाहः।

२. अक्रूरस्य द्वारकां प्रति पुनरागमनम्।

३. सत्यभामायाः विवाहः।

### विश्लेषणात्मकप्रश्नाः

१. जाम्ववत्याः परिणयं लिखत।

२. जाम्ववता सह श्रीकृष्णस्य युद्धं वर्णयत।

### निबन्धात्मकप्रश्नाः

१. स्यमन्तकोपाख्यानं प्रतिपादयत।

२. शतधन्वानः वधं विशदयत।

३. श्रीकृष्णस्य विवाहादीन् निरूपयत।

### एकाङ्कप्रश्नाः

१. हस्तिनापुरस्य राजा कः ?

२. स्यमन्तकमणिं कः प्राप्तवान् ?

३. कः मणिं ददौ ?

४. जाम्ववती कस्य कन्या ?

५. सत्यभामा कस्य पुत्री आसीत् ?

६. सत्राजितस्य भ्राता कः ?

७. कः सत्राजितम् अमारयत् ?

८. प्रसेनं कः हतवान् ?

९. विन्दानुविन्दयोः भगनी का ?

१०. नग्नजितः कस्य देशस्य राजा आसीत् ?

११. सत्यायाः अपरं नाम किम् आसीत् ?

१२. केकयदेशस्य कन्या का ?

१३. लक्ष्मणा कस्य प्रदेशस्य कन्या आसीत् ?

१४. सत्यायाः वरः कः ?

१५. सूर्यदेवस्य कन्या का ?

**उत्तराणि**

१. धृतराष्ट्रः २. सत्राजितः ३. सूर्यः ४. जाम्ववतः ५. सत्राजितस्य ६. प्रसेनः ७. शतधन्वा ८. सिंहः ९. मित्रविन्दा १०. कोसलस्य ११. नग्नजिती १२. भद्रा १३. मद्रस्य १४. श्रीकृष्णः १५. कालिन्दी

# चतुर्थोऽध्याय:

## प्रस्तावना

श्रीमद्भागवतमहापुराणं भगवत: लीला प्रतिपादने उत्कृष्टतां प्रतिपादयति। अस्य महापुराणस्य महन्महत्त्वं सर्वत्र विद्योतते। अस्य महापुराणस्य विविधान् श्लोकान् विविधेषु सन्दर्भेषु दरिदृश्यते। अत: पुराणमिदं भगवत: स्वरूपभूतं वर्तते। जानन्ति सर्वे दशमस्कन्धे भगवत: कीदृशी लीला विहिता दृश्यते। अत: एतस्य स्कन्धस्य अपि महत्त्वं सर्वातोधिकं दृश्यते। अस्मिन् अध्याये नरकासुरादीनां वर्णनं प्रतिपाद्यते। तै: सार्द्धं भगवत: विविधाभि: कन्याभि: सह विवाहादय: प्रस्तूयन्ते।

## उद्देश्यम्

अस्मिन् अध्याये पाठका: एतान् विन्दून् वेदिष्यन्ति।

- मुरस्य वध:
- भौमासुरस्य वध:
- षोडशसहस्रराजकन्याभि: सह भगवत: विवाह:
- भगवत: सन्ततय:
- अनिरुद्धस्य विवाहोत्सवे रुक्मी वध:

## मुरस्य वधः

परीक्षितस्य प्रश्नेन शुकदेवः भगवतः लीलावर्णनप्रसङ्गे नरकासुरस्य वर्णनमकरोत्। अस्य नरकापुरस्य राजधानी आसीत् प्राग्ज्योतिषपुरः। अस्मिन् पुरे भगवान् सत्यभामया सह प्रस्थितोऽभवत्। अयं नरकासुरः देवानां शत्रुः आसीत्। एषः भूमिपुत्रः आसीत्, अतः एतस्य नाम भौमासुरः अपि प्रथितोऽभवत्। एषः वरुणस्य छत्रं, देवमातुः अदितेः कुण्डलं, मेरुपर्वते स्थितानां देवानां स्थानं स्वीकृतवान्। एतस्य संहारार्थं भगवान् श्रीकृष्णः सत्यभामया सह तं पुरं प्रति जगाम। तत्र गमनमतीवदुष्करं वर्तते। सर्वे पर्वताः अस्य पुरस्य प्राचीरसदृशाः आसन्। पर्वतानामधः भागे सदासर्वदा जलपरिवेष्टितोऽभूत्। विविधानां शस्त्राणाम् अवृताकारः परिच्छिन्नः आसीत। अग्निविद्युत्वायुः तस्य प्रदेशस्य प्राचीरसदृशाः अवस्थिताः आसन्। भगवान् श्रीकृष्णः अस्य नरकासुरस्य सर्वं प्राचीरं ध्वस्तविध्वस्तं कृतवान्। ततः स्वीयसुदर्शनचक्रेण सर्वं नष्टं चकार। अनेन कारणेन जले निमग्नेन सुप्तस्य शयनरतस्य मुरासुरस्य निद्रा भग्ना जाता। तस्मात् उत्थाय सः सर्वतो दृष्ट्वा कः एतादृशं कार्यं चकार इति अन्विष्टवान्। एषः मुरः प्रचण्डसूर्यसदृशः आसीत्। अग्निसमानं तेजः धृत्वा त्रिपुरं दग्धं कृत्वा भक्षणं कर्तुं समर्थः आसीत्। अस्य असुरस्य पञ्चमुखाः आसन्। एषः राक्षसः अनेन पञ्चमुखेन यथा सर्वान् भक्षणं करिष्यति तथा तस्य आभा आसीत्। एषः स्वस्य त्रिशूलं बहुवेगेन गरुडस्य हननार्थं प्रेषितवान्। ततः भगवान् श्रीकृष्णः तस्य रक्षणार्थं शराभ्याम् अभिनत्। ततः मुरः स्वगदायां भगवतः उपरि प्रचण्डप्रहारं कर्तुं प्रयत्नं चकार। परन्तु भगवान् श्रीकृष्णः स्वगदया तस्य गदायाः खण्डविखण्डितं चकार। यदा भगवन्तं श्रीकृष्णं स्वहस्ते धर्तुं प्रयासः आचरितः तदानीं श्रीकृष्णः स्व सुदर्शनचक्रेण तस्य मस्तकस्य खण्डं चकार। तस्य मुरस्य मस्तकानि खण्डितानि जातानि ततः सः भूमौ पतितः जातः। तस्य मरणं दृष्ट्वा तस्य सप्तपुत्राः अधीराः अभूवन्। ते च सप्तपुत्राः भवन्ति ताम्रः, अन्तरिक्षः, श्रवणः, विभावसुः,वसुः, नभस्वानः,अरुणश्च। एते सप्तपुत्राः स्वीयास्त्राणि क्षेपयामासुः। ततः भगवतः अमोघशक्त्या तेषामस्त्राणां खण्डविखण्डनं चकार। एवं प्रकारेण मुरस्य तथा तस्य सप्तपुत्राणां मृत्युरभवत्। मुरस्य वधं दृष्ट्वा अन्ये च सर्वे राक्षसाः समागताः जाताः। तेषां राक्षसानाम् अपि संहारः भगवता श्रीकृष्णेन कारितः। सः एकैकं बहून् राक्षसान् निहतं अकरोत्।

बोधप्रश्नः

१. वरुणस्य छत्रं कः अहरत्?

२. नरकासुरस्य माता का?

३. मुरासुरस्य कति पुत्राः आसन्?

## भौमासुरस्य वधः

समेषामसुराणां वधं दृष्ट्वा नरकासुरः साक्षात् प्रतियोत्सुं समागतः । तेन सह तस्य सेनापतिः पीठस्तथा अन्ये च सर्वे दानवाः ययुः। भगवान् श्रीकृष्णः एतान् सर्वान् स्वशरेण एकेन एकेन वधं चकार। ततः एतेषां समेषां वधं दृष्ट्वा मनसि बहु क्रोधेन श्रीकृष्णस्य उपरि शरप्रहारम् अकरोत्। एतस्य नरकासुरस्य प्रकोपात् स्वस्य रक्षणं स्वधनुषा श्रीकृष्णः अकरोत्। नरकासुरस्य सर्वे सैन्याः विविधेषु शस्त्रेषु पारङ्गताः आसन्। ते विविधानि अस्त्राणि प्रेषितवन्तः। यद्वारा भगवान् श्रीकृष्णः अपि स्वप्रभावेन सर्वान् हननं कृतवान्।

नरकासुरः शतघ्नी नाम्नी अमोघशक्त्या प्रयोगः चकार। परन्तु पुराणपुरुषोत्तमः भगवान् श्रीकृष्णः तस्य अस्त्रस्य अपि स्वीयसुदर्शनमाध्यमेन अकरोत्। नरकासुरस्य सर्वे सैन्याः निहताः जाताः। गरुडस्य प्रहारेण अपि मदोन्मत्ताः गजाः क्षतविक्षताः जाताः। ततः एकाकी नरकासुरः भगवता सह युद्धं कृतवान्। गरुडः एव सर्वान् भक्षणं करोति इति ज्ञात्वा तस्य उपरि विविधास्त्रं प्रेषितवान् परन्तु तत् सर्वं गरुडस्य किमपि न अकरोत्। परिशेषेण नरकासुरः स्वस्य त्रिशूलं प्रेषितवान्। ततः भगवतः चक्रस्य प्रभावेन तस्य त्रिशूलस्य खण्डः जातः। ततः सुदर्शनेन तस्य शिरसः खण्डनं चकार। अनेन प्रकारेण तस्य नरकासुरस्य संहारः अभूत्। यः नरकासुरः सर्वेषां देवानां विविधानि आयुधानि स्वीकृत्य स्वगृहे स्थापितवान्। तस्य सर्वं स्वीकृत्ये देवेभ्यः दत्तवान्।

बोधप्रश्नः

१. नरकासुरस्य सेनापतिः कः आसीत्?

२. शतघ्नी का वर्तते?

३. कः सर्वान् गजान् अखादत्?

## भूदेव्याः स्तुतिः

नरकासुरस्य संहारानन्तरं तस्मिन् स्थाने शङ्खनादमभवत्। ततः देवाः पुष्पमाध्यमेन देवस्य श्रीकृष्णस्य उपरि वर्षणं विहितम्। ततः सर्वे देवाः भूदेवी च तत्रागत्य भगवतः गुणगानं विध्यनुसारं चकार। भूदेवी भगवतः स्तुतिं कृतवान्। भूदेवी विश्वेश्वरस्य देवाधिदेवस्य श्रीकृष्णस्य स्तुति भिन्न भिन्नरूपेण कृतवती। समग्रसंसारस्य आश्रयदाता परंब्रह्म परात्परः नारायणस्य अंशावतारः भगवान् श्रीकृष्णः। हे भगवन् भवतः मङ्गलं भवतु। समेषां जीवानां गतेः मूलकारणं तथा प्राणस्वरूपं भवान् एव भवति। सर्वे भवति लिप्ताः भवन्ति। भवतः गुणाः अवर्णनीयाः। अनन्तगुणपरिपूर्णाः भवन्ति भवन्त अशेषकृपाः। अहं प्रणामाञ्जलीं भवतः कृते समर्पयामि। सर्वेषामिन्द्रियाणामधिष्ठाता भवान् एव सकलस्य भूतस्य आधार। मम पुत्रस्य नरकासुरस्य पुत्रः भगदत्तः अत्यन्त भयालु वर्तते। तस्य कृते अभयं देहि।

बोधप्रश्नः

१. भूदेवी का आसीत्?

२. नरकासुरस्य पुत्रस्य नाम किम् आसीत्?

३. कस्य गुणाः अवर्णनीयाः?

## षोडशसहस्रराजकन्याभिः सह भगवतः विवाहः

भूदेव्याः स्तुत्या अति प्रसन्नः भगवान् सर्वेभ्यः अभयं दत्तवान्। नरकासुरस्य प्रासादे तदनन्तरं प्राविशत्। तस्य नरकासुरस्य यानि दैविकद्रव्याणि आसन् तानि सर्वाणि स्वीकृत्य देवेभ्यः दत्तवान्। ततः वरुणस्य छत्रं देवमातुः अदितेः कुण्डलादीनि सर्वणि वस्तूनि स्वीकृत्य देवेभ्यः ददौ। नरकासुरस्य कारागरे ये वन्दीरूपेण आसन्, तेषां मुक्तिः भगवान् श्रीकृष्णः कृतवान्। तस्य कारागारे षोडशसहस्रकन्याः आसन्। श्रीकृष्णस्य उपरि सर्वाः कन्याः मोहिताः अभूवन्। ततः सर्वः अपि श्रीकृष्णं पतिरूपेण प्राप्तुं मनोभिलाषां समर्पितवत्यः। ततः तासां

मनोभिलाषामवगम्य भगवान् श्रीकृष्ण: सर्वासां मनस्कामनाया: परिपूर्णं च अकरोत्। तत: एता: सर्वा: अपि वस्त्रादि भूषणानि परिधृत्य स्वद्वारकापुरीं प्रति प्रेषितवान्।

बोधप्रश्न:

१. सर्वासां कन्यानां मनोभिलाषा का आसीत्?

२. देवमातु: अदिते: कुण्डलानि क: तस्यै ददौ?

## श्रीकृष्णस्य रुक्मिणीं प्रति परिप्रश्ना:

कदाचित् शान्तमनसा भगवान् श्रीकृष्ण: निद्रायां शयनरत: आसीत्। तदानीं सर्वेऽपि जना: विञ्छणादि सेवायां तत्परा: आसन्। तस्मिन् समये रुक्मिणी परमसौन्दर्यशाली भगवन्तं प्रति समागत्य सेवां कर्तुं प्रयतते स्म। तत: निद्राया: अनन्तरं भगवान् यदा ददर्श यत् रुक्मिणी तस्य सेवायां निमग्ना आसीत् तत: विविधं कथोपकथनं प्रश्नोपश्नमाध्यमेन प्रेमालापं चकार।

साक्षात् भगवत्या: लक्ष्म्या: स्वरूपभूतो वर्तते रुक्मिणी। तां रुक्मिणीं दृष्ट्वा भगवान् श्रीकृष्ण: कथयामास हे जगन्मात! अस्मिन् प्रपञ्चे बहव: नरपतय: भवत्या: कृते स्वभिलाषं स्वीकृत्य पत्नीरूपेण प्राप्तकामा: आसन्। शिशुपालसदृशा: कामोन्मत्ता: अपि तेषु परिगणित: आसीत्। इतोऽपि बहव: राजान: भवतीं पत्नीरूपेण प्राप्तुकामा: आसन्। तान् अतिरिच्य किमर्थं मम कृते भवत्या: मनोभिलाषा आसीत्? जरासन्धस्य भयेन अहं समुद्रस्य शरणं प्रति आजगाम। सर्वेभ्य: राजेभ्य: विभ्यत: समुद्रं प्रति आगत्य तिष्ठामि। वयं शश्वन्निष्किञ्चना: निष्किञ्चनजनप्रिया: च। तस्मात् ये प्रायेण ह्याढ्या ते मां न भजन्ति। विवाह: सर्वदा गुणरूपक्रियासौन्दर्यैश्वर्यवद्भि: पुरुषै: सह भवेत् परन्तु तन्न मम पक्षे किमपि विद्यते। अत: किमर्थं मया साकं परिणयं कर्तुम् इयेष? वृथया दरिद्रेभ्य: मम प्रशंसां श्रुत्वा मया सह विवाहं चकार। इदानीमपि समय: न गत:, अनुगुणं पतिं वरय। शिशुपालजरासन्धदन्तवक्त्रादय: तथा तव भ्राता अपि मम द्वेषिण: सर्वे सन्ति अत: किमर्थं मया सह परिणेतुम् इयेष?

एतच्छुत्वा भगवती लक्ष्मी रुक्मिणी बहुक्रन्दनं कृतवती। अतीवदु:खेन निमग्ना अभूत्। तत: भगवान् साक्षात् तस्य विखरितान् केशान् एकत्रीकृतवान्। तत: परिहासेन एतत् सर्वं प्रोवाच इति कथयामास । तत: रुक्मिणी तस्मात् परिहासेन इति श्रुत्वा मनसि क्लैव्यतां परित्यक्तवती। भगवती रुक्मिणी एव भगवत: प्रेयसी। यस्या: मनसि भगवन्तम् अतिरिच्य न किमपि विद्यते। तस्मात् एषा भगवत: अपि अति प्रिया आसीत्। एतत् श्रुत्वा रुक्मिणी अपि उवाच यत् अवश्यं सर्वसां कृते रूपवलान्वितसौन्दर्ययुक्तस्तथा ऐश्वर्यवान् वर: अपेक्ष्यते। परन्तु तेषां समेषां जानानाम् आधारभूत: भवान् एव। भवत: अनुकम्पया एव संसारे सर्वं प्रतिष्ठितं भवति। वेदा: उपनिषद: भवत: गुणानां कीर्तनं कुर्वन्ति। पुराणपुरुषोत्तम: भवान् सकलजीवगतानां परमेश्वर: सर्वान्तर्यामी भवान् एव वर्तते। अत: श्रेष्ठपुरुष: भवानेव। क्रमश: सर्वे नष्टा: भविष्यन्ति। इन्द्रियाणां कामनापाशत: न कोऽपि मुञ्चति। परन्तु अकिञ्चनरूपेण भवानेव सर्वेषां स्वरूपभूतो वर्तते। प्राचीनकाले अङ्गपृथुभरतययातिगयादि सर्वे स्वराज्यसिंहासनं परित्यागं कृत्वा वनं प्रति जग्मु:। अत: निष्किञ्चनजना: भवन्त: प्रिया: भवन्ति। भवत: शरणं प्रति अहं सदासर्वदा गच्छामि। तत्पादपद्मस्य आश्रयं स्वीकत्य संसारस्य मोहमायात: दूरे विचरामि। साक्षात् लक्ष्मी तस्मिन् पादपद्ममाश्रित्य तिष्ठति। एवं प्रकारेण विविधप्रश्नोत्तरछलेन श्रीकृष्णरुक्मिण्यो: कथोपकथनं श्रूयते।

बोधप्रश्न:

१. शिशुपालस्य विवाह: कया सह निर्धारित: आसीत्?

२. भगवत: परमप्रेयसी का आसीत्?

३. निष्किञ्चनजनप्रिय: क:?

### भगवत: सन्ततय:

भगवत: षोडशसहस्रपत्नय: आसन्। ता: सर्वा: स्त्रिय: स्वसौन्दर्यस्य महोजाले पतित्वा आत्मानं बहुमन्यन्ते स्म। सर्वा: चिन्तयामासु: यत् भगवान् श्रीकृष्ण: मदतिरिच्य न कस्याश्चित् भवने तिष्ठति। अत: सर्वा: अपि आनन्देन निवसत्य: आसन्। सर्वा: श्रीकृष्णस्य कमलकलिमृदुहासविशालवाहुमीननयनादिभि: प्रेमालापम् अकुर्वन्। भगवत:

अनन्तता न कोऽपि ज्ञातुं समर्था आसीत्। सर्वाभ्यः बहवः पुत्राः समुपजाताः। एकैकक्रमशः सर्वाभ्यः दश पुत्राः जज्ञिरे। सर्वादौ रुक्मिण्याः गर्भात् दशपुत्राः इमे भवन्ति यथा – प्रद्युम्नः, चारुदेष्णः, सुदेष्णः, चारुदेहः, सुचारुः, चारुगुप्तः, भद्रचारुः, चारुचन्द्रः, विचारुः, चारुश्च । एते सर्वेऽपि पुत्रा भगवत्सदृशाः भवन्ति। ततः सत्यभामायाः सकाशात् दशपुत्राः इमे भवन्ति यथा – भानुः, सुभानुः, स्वर्भानुः, प्रभानुः, भानुमान्, चन्द्रभानुः, वृहद्भानुः, अतिभानुः, श्रीभानुः, प्रतिभानुश्च। जाम्ववत्याः अपि दशपुत्राः क्रमशः जज्ञिरे यथा –साम्वः, सुमित्रः, पुरुजित्, शतजित्, सहस्रजित्, विजयः, चित्रकेतुः, वसुमान्, द्रविडः, क्रतुश्च। एते दशपुत्राः श्रीकृष्णस्य अत्यन्तप्रियाः आसन्।

नग्नजित्याः सत्यायाः अपि दशपुत्राः अभूवन्। ते भवन्ति इमे यथा – वीरः, चन्द्रः, अश्वसेनः, चित्रगुः, वेगवान्, वृषः, आमः, शङ्कुः, वसुः, कुन्तिश्च। कालिन्द्याः अपि दशपुत्राः जज्ञिरे, यथा – श्रुतः, कविः, वृषः, वीरः, सुवाहुः, भद्रः, शान्तिः, दर्शः, पूर्णमासः, सोमकश्चेति। लक्ष्मणायाः गर्भादपि प्रघोषगात्रवाान्सिंहवलप्रवलर्ध्वगमहाशक्तिसहोजापराजितख्याः दशपुत्राः अभूवन्। मित्रविन्दायाः दशपुत्राः इमे भवन्ति यथा – वृकः, हर्षः, अनिलः,गृध्रः, वर्द्धनः, अन्नादः, महाशः, पावनः, वह्निः, क्षुधी। भद्रायाः दशपुत्रा अपि जज्ञिरे, यथा – संग्रामजित्, बृहत्सेनः, शूरः, प्रहरणः, अरिजित्, जयः, सुभद्रः, वाम, आयुः, सत्यकः।

एताः अतिरिच्य अन्याः षोडशसहस्रभार्याः आसन्। तासामपि दीप्तिमान्ताम्रतप्तादि दशपुत्राः अजायन्त। एवं प्रकारेण श्रीकृष्णस्य बहवः पुत्राः पौत्राश्च जज्ञिरे।

बोधप्रश्नः

१. मित्रविन्दायाः कति पुत्राः आसन्?

२. साम्वस्य मातुः नाम किम्?

३. प्रहरणः कस्य पुत्रः बभूव?

४. वेगवतः माता का आसीत्?

## अनिरुद्धस्य विवाहोत्सवे रुक्मीवधः

परीक्षितः शुकदेवं प्रति पप्रच्छ यत् कथं प्रद्युम्नेन सह रुक्मी तस्याः दुहितायाः विवाहं कारितवान्? श्रीकृष्णस्य विद्वेषी सत्त्वेऽपि रुक्मी कथमेतादृशं कार्यं चकार ? अस्य प्रश्नस्य समुत्तरप्रदानपूर्वकं शुकदेवः सकलं रहस्यं कथयामास। प्रद्युम्नः अतीव पराक्रमशाली तथा साक्षात् कामदेवस्वरूपसुन्दरयुक्तः आसीत्। तेन सह रुक्मवत्याः विवाहः केवलं रुक्मिण्याः प्रसन्नार्थं कृतवान्। पुनः स्वयम्वरे रुक्मवती साक्षात् प्रद्युम्नस्य रूपलावण्येन सन्तुष्टः सन् वरणमालां अस्थापयत्। ततः तत्र यः युद्धः उपागतः तत्र एकाकी सर्वान् नृपान् विजित्य रुक्मवतीं स्वीकृत्य जगाम। एतदतिरिच्य रुक्मिण्याः दशपुत्राः आसन्, तथा एका कन्या आसीत्। तस्याः कन्यायाः विवाहः कृतवर्मणः पुत्रेण वलीना सह अभूत्। प्रद्युम्नस्य पुत्रः अनिरुद्धः समजायत। तस्य अनिरुद्धस्य विवाहः पौत्र्या रोचनया सह रुक्मी कारितवान्। अनिरुद्धस्य विवाहोत्सवं प्रति श्रीकृष्णेन सह वलरामः, रुक्मिणी, प्रद्युम्नः, साम्वादयः सर्वेऽपि यादवाः द्वारकावासिनः गतवन्तः। तस्मिन् विवाहोत्सवे अन्येषां प्ररोचनायां रुक्मी वलरामेण सह अक्षक्रीडां चकार। तेन सह क्रीडित्वा बहु किमपि विजितवान्। ततः अन्तिमपर्याये वलरामस्य जयः अभूत्। परन्तु रुक्मी धुर्त्ततया सह प्रोवाच यत् द्युतक्रीडायां सः जयं कृतवान्। परन्तु एतादृशं परिहासपूर्णं वचनं श्रुत्वा वलरामः क्रुधः अभूत्। पुनः अपि असकृत् सर्वे वलरामस्य उपहासं कारितवन्तः। परिशेषेण वलरामः क्रुद्धः सन् स्वस्य मुद्गरं धृत्वा एकेन प्रहारेण यमलोकं प्रेषयामास। ततः अन्ये ये हसितवन्तः तान् अपि वलरामः स्वमुष्टिप्रहारं कृत्वा वहु अताडयत्। अस्मिन् विवाहोत्सवे एव वलरामस्य प्रहारेण सर्वे केचन यमलोकं प्रति जग्मतुः।

अनेन प्रकारेण अनिरुद्धस्य विवाहोत्सवे विविधानां राज्ञां हननमभूत्। तथापि श्रीकृष्णः कौशलेन न किमपि कथयामास। एतस्मिन् अवसरे विवाहकार्यं पूर्णमभूत्।

बोधप्रश्नः

१. अनिरुद्धस्य मातुः नाम किम् ?

२. दुर्योधनस्य कन्यां कः अहरत् ?

२. लक्ष्मणा कस्य कन्या आसीत् ?

**सारांश: –**

अस्मिन् अध्याये भौमासुरस्य वधविषय: प्रस्तुत:। अत्र भूमिपुत्रस्य नरकासुरस्य सैन्यानां संहार: तथा मुरासुरस्य विषये समुपवर्ण्यते। अस्य मुरस्य पञ्चमुखा: आसन्। भगवान् श्रीकृष्ण: एतस्य मुखं कर्तनं चकार। पुन: अस्य मुरस्य सप्तपुत्राणां संहार: श्रीकृष्ण: स्वयमेव स्वस्य सुदर्शनचक्रेण कारितवान्। तत: नरकासुरस्य सैन्यानां तथा सेनाध्यक्षस्य वध: अभूत्। भगवत: श्रीकृष्णेन सह रुक्मिण्या: सानन्दरूपेण वार्तालाप: प्रतिपादित:। तत्र भगवान् श्रीकृष्ण: स्वस्य विविधान् चरितान् प्रस्तौति, तथा रुक्मिण्या: प्रेम प्रतिपादितं वर्तते। तत: श्रीकृष्णस्य सर्वेषां पुत्राणां चित्रणं तथा तेषां नामानि वर्णितानि सन्ति। प्रद्युम्नस्य विवाह: तथ अनिरुद्धस्य विवाहादि विषया: प्रस्तुता: दृश्यन्ते। अस्मिन् अध्याये अपि वलराम: रुक्मीं हतवान्। अनिरुद्धस्य विवाहोत्सवे विविधानां राज्ञां हननं प्रतिपादितं वर्तते। सर्वासां भार्याणां पुत्रादीनां विषये अस्मिन् अध्याये वर्णितो विद्यते।

# आदर्शप्रश्नाः

## लघूत्तरीयप्रश्नाः

१. रुक्मवत्याः विवाहः।

२. मुरस्य वधः।

३. कालन्द्याः पुत्राः।

## विश्लेषणात्मकप्रश्नाः

१. अनिरुद्धस्य विवाहोत्सवे विविधानां शत्रूणां संहारं स्पष्टयत।

२. विविधाभिः राजकन्याभिः सह श्रीकृष्णस्य विवाहं वर्णयत।

३. नरकासुरस्य मातुः भूदेव्याः भगवत्स्तुतिं प्रतिपादयत।

## निबन्धात्मकप्रश्नाः

१. नरकासुरस्य संहारम् आलोचयत।

२. भगवतः पुत्राणां सूचीं निर्धारयत।

३. श्रीकृष्णरुक्मिण्याः सम्वादं विशदयत।

## एकाङ्कप्रश्नाः

१. भौमासुरस्य माता का?

२. भौमासुरस्य अपरं नाम किम्?

३. कस्य पञ्चमुखाः आसन्?

४. मुरस्य कति पुत्राः आसन्?

५. मुरः केन हतः?

६. भौमासुरस्य सेनापतिः कः?

७. का श्रीकृष्णस्य स्तुतिं चकार?

८. नरकासुरस्य राजधानी कुत्र वर्तते ?

९. रुक्मिण्याः द्वितीयपुत्रस्य नाम किम् ?

१०. श्रुतस्य माता का ?

११. मित्रविन्दायाः कतिपुत्राः आसन् ?

१२. चारुचन्द्रस्य माता का ?

१३. मायावती कस्य पत्नी आसीत् ?

१४. साम्वस्य माता का ?

१५. शङ्कोः माता का ?

**उत्तराणि**

१. भूदेवी २. नरकासुरः ३. मुरस्य ४. सप्त ५. श्रीकृष्णेन ६. पीठः

७. भूदेवी ८. प्राग्जयोतिष्कपुरः ९. चारुदेष्णः १०. कालिन्दी ११. दश १२. रुक्मिणी

१३. शम्वरासुरस्य १४. जाम्ववती १५. सत्या

# पञ्चमोऽध्यायः

## प्रस्तावना

यद्यपि अस्मिन् महापुराणे श्रीकृष्णस्य चरितं सर्वतो दृश्यते तथापि अन्येषां देवानां विषये अपि अस्मिन् पुराणे चर्च्यते। पुराणमिदं न केवलं वैष्णवानां प्रियं वर्तते अपितुं समेषां पाठकानां रुचिवर्धनाय अस्य महापुराणस्य महत् योगदानं श्लाघ्यते। अस्य दशमस्कन्धस्य उत्तरार्द्धे यद्यपि श्रीकृष्णस्य पुत्राणां विषये मार्मीकतया प्रतिपाद्यते तथापि अस्मिन् स्कन्धे भगवतः श्रीकृष्णस्य अनेकेषां दुष्टानां विदलने संहारकत्वं प्रतिभाति। अस्य अध्यायस्य प्रागेव यद्यपि अनिरुद्धस्य विवाहः सञ्जातः तथापि अन्यैः सह अनिरुद्धस्य विवाहस्तथा वाणासुरेण सह युद्धः, शिवस्य वरदानेन वाणासुरस्य अतीव दुष्टता प्रतिपाद्यते

## उद्देश्यम्

अस्मिन् अध्याये पाठकाः एतान् सर्वान् निम्नोक्तान् विषयान् वेदिष्यन्ति।

- **वाणासुरस्य पराक्रमः**
- **उषाचित्रलेखयोः सम्वादः**
- **कृष्णवाणासुरयोः युद्धवर्णनं**
- **नृगोपाख्यानम्**
- **वलरामस्य व्रजगमनम्**

## वाणासुरस्य पराक्रमः

पुराकाले भगवतः श्रीविष्णोः परमभक्तः आसीत् प्रह्लादः। तस्य मनसि अनन्यभक्तिरासीत्। तदर्थं सः मोक्षपदवीं लब्ध्वा विष्णुलोके निवसति। तस्य प्रह्लादस्य पुत्रः विरोचनः वर्तते। तस्य च पुत्र वली आसीत्। वलेः शतपुत्राः आसन्। तेषु पुत्रेषु वाणासुरः परमप्रतापी आसीत्। स्वतपसा सः महादेवं सन्तुष्टं कारितवान्। तदर्थं सः महादेवः यथेष्टं वरं तस्मै ददौ। तेन वरेण सः त्रैलोक्यं विजित्य स्वशासनं चकार। देवाः सर्वे तस्य वाणासुरस्य सेवानिमित्तं समागताः आसन्। एषः वाणासुरः दृढ़प्रतिज्ञः आसीत्। तदर्थं तस्य आदरः सर्वत्र आसीत्। सः धीमान् तथा सत्यसन्धः आसीत्। यदा सः शोणितपुरे शासनं कृतवान् तदानीं तस्य सेवा सर्वे देवाः सर्वदा आगत्य कुर्वन्तः आसन्। कदाचित् महादेव भगवान् शङ्करः ताण्डवनृत्यसमये स्वस्य सहस्रभुजैः विविधानि वाद्यानि वादयित्वा भगवन्तं शङ्करं तोषयामास। भक्तवत्सलः भगवान् शङ्करः यथेष्टं वरं याचितुं कथयामास। तदानीं सः तस्य पुरस्य रक्षणार्थं वरं वव्रे। कदाचित् एषः वाणासुरः भगवतः शङ्करस्य पादाम्वुजं संस्पृशं कृत्वा वीर्यदुर्गमेन सह स्वीयं दर्पं कथयामास। मम सहस्रभुजाः केवलं संसारे भारस्वरूपं विद्यन्ते। एतेषां भुजानां न कोऽपि समर्थः योद्धा योद्धुं वर्तते। अतः तत् केवलं मम कृते भाराय भवति। कदाचित् एते सर्वेऽपि कण्डूयमानाः जाताः। तदर्थमेतेषां प्रहारेण सः गिरिपर्वतान् भग्नं कारितवान्। ततः भगवान् शङ्करः तस्मै कश्चित् अवश्यमग्रे महादेवः इव योद्धा अवश्यं प्राप्तिः भविष्यति इति क्रुद्धेन प्रोवाच। ततः सः तस्य वीरस्य प्रतीक्षायामासीत्। एतस्य वलशौर्यं च अतुलनीयं वर्तते। भगवतः शङ्करस्य अशेषकृपाकारणात् अस्य वाणासुरस्य शौर्यम् अवर्धत।

बोधप्रश्नः

१. वाणासुरः कम् प्रार्थयामास ?

२. कस्य शतं पुत्राः आसन् ?

३. कः सर्वान् पर्वतान् ताडितवान् ?

## उषाचित्रलेखयोः सम्वादः

अस्य परमप्रतापयुक्तस्य वाणासुरस्य काचित् एका सुन्दरी रूपवती कन्या आसीत् यस्याः नाम उषा। कदाचित् एषा स्वप्ने एकेन सुन्दरेण राजपुरुषेण विहरणं करोति इति ददर्श। तस्मिन् स्वप्ने तस्य अनिरुद्धस्य सहसा अदृश्यकारणात् भृशं सा व्रीडिता अभूत्। वाणासुरस्य कश्चित् मन्त्री कुम्भाण्डः इति नाम्ना आसीत्। तस्य पुत्री भवति चित्रलेखा। एषा उषसः सहचरी आसीत्। उषा कथयामास यत् स्वप्ने एकं सुन्दरं युवकमहं ददर्श। तत्क्षणादेव सः अतीव दीर्घवाहुयुक्तः परमप्रतापी पुरुषः कुत्रचित् अन्तर्धानभूत्। चित्रलेखा तां प्रत्युवाच यदहं सर्वेषां चित्राङ्कनं करिष्यामि यः भवत्याः प्राणवल्लभः तस्य चित्रं दृष्ट्वा मां वदतु इति। ततः चित्रलेखा सर्वेषां देवगन्धर्वयक्षराक्षसपन्नगसिद्धचारणविद्याधरादीनां चित्राङ्कनं चकार। पुनः मर्त्यलोके वसुदेवस्य वासुदेवस्य तथा वलरामादीनामपि चित्राङ्कनं कृतवती। परिशेषेण प्रद्युम्नस्य पुत्रस्य अनिरुद्धस्य यदा चित्राङ्कनं चकार, तदानीम् उषा एतस्य विषये चित्रलेखां कथयामास। चित्रलेखा काचित् योगिनी आसीत्। सा ज्ञातवती यत् एषा श्रीकृष्ण्य पौत्रः। आकाशमार्गे योगवलेन सा सुप्तावस्थायाम् अनिरुद्धं स्वीकृत्य उषसः शयनकक्षायां प्रति आनीतवती। ततः स्वस्य प्राणवल्लभस्य मुखं दृष्ट्वा सा अत्यन्त प्रीता आसीत्। तेन सह तस्मिन् गृहे उषा मुदिता सती सर्वेषां दुष्प्रेक्ष्ये रेमे। अरिरुद्धः अपि सर्वं विस्मृत्य अनया सह प्रतिरेमे। ततः कदाचित् सन्देहवशतः सर्वे जनाः वाणासुरस्य सम्मुखे एतस्मिन् विषये प्रबोधयामास। ततः वाणासुरः उषसः शयनकक्षां प्रति आजगाम। तत्र अनिरुद्धेन सह उषा क्रीडारता आसीत्। तेन वाणासुरस्य प्ररोचनेन सर्वे सैन्याः तस्य आक्रमणं कर्तुं यदा गतवन्तः तदानीम् अनिरुद्धः सर्वान् नाशितवान्। ततः क्रुद्धः सन् वाणासुरः नागपाशेन तस्य वन्धनं चकार। पत्युः वन्धनं दृष्ट्वा उषा रुरोद।

बोधप्रश्नः

१. चित्रलेखा का आसीत्?

२. उषा स्वप्ने कं ददर्श?

३. कः अनिरुद्धं नागपाशे ववन्ध?

## कृष्णवाणासुरयोः युद्धवर्णनम्

द्वारकायमनिरुद्धस्य अदर्शनं हेतोः सर्वे चतुर्मासं यावत् क्व गतः इति चिन्तयामास। कदाचित् नारदेन सह कथोपकथनसमये अनिरुद्धः कथं वाणासुरस्य कन्यया सह परिणयं कृत्वा नागपाशेन वद्धः इति असूचयत्। एतच्छ्रुत्वा सर्वेऽपि यादवाः रोषणपुरं प्रति द्वादशभिः अक्षौहिणीभिः सर्वतोदिशं रुरुधुः। प्राचीरनगरादीनां भज्यमानं दृष्ट्वा वाणासुरः रुष्टः अभूत्। तत्र साक्षात् भगवान् शिवः कार्तिकेयं नीत्वा भीषणयुद्धं ताभ्यां कृष्णवलरामाभ्यां सह चकार। भगवान् शिवेन सह श्रीकृष्णः तथा प्रद्युम्नेन सह कार्तिकेयस्य भीषणयुद्धः अभूत्। युद्धस्य दर्शनार्थं सर्वेऽपि सिद्धगन्धर्वदानवविद्याधरैः सह ब्रह्मा अपि समागतः आसीत्। विविधानाम् अस्त्रशस्त्राणां माध्यमेन सर्वे युद्धे रताः आसन्। तस्मिन् युद्धे जृम्भणास्त्रेण श्रीकृष्णः महादेवं मोहितवान्। तेन सः अन्यैः सार्द्धं युद्धं कृत्वा तान् अमारयत्। सर्वे रणभूमौ निहताः जाताः एतत् दृष्ट्वा वाणासुरः अतीव क्रुद्धः सन् सर्वान् यादवान् मारयितुं प्रयासं कृतवान्। ततः श्रीकृष्णस्य शरेण सर्वा माया अन्तर्हिता जाता। सः वाणासुरः स्वस्य सहस्रभुजैः पञ्चशतानि धनूंषि आकृष्य वाणं सन्दधे। तेन भगवान् श्रीकृष्णः अपि स्ववाणवर्षणेन तस्य धनूंषि भग्नीचकार। ततः वाणासुरस्य धर्ममाता कोटरा तस्य रक्षणं कृत्वा जीवनदानं दत्तवान्। अनेन सः वाणासुरः पलायितः अभवत्। तत्र भगवतः शिवस्य माहेश्वरज्वरः श्रीकृष्णेन सह योद्धुं ययौ। ततः श्रीकृष्णः वैष्णवज्वरं प्रषयामास। अनन्तरं माहेश्वरज्वरस्य प्रभावः वैष्णवज्वरेण निहितः जातः। अतः सः माहेश्वरज्वरः शरणार्थी रूपेण हृषीकेशं तुष्टाव। ततः ज्वरः बहु प्रार्थनां कृत्वा स्वस्य रक्षणं कृतवान्।

पुनः वाणासुरः स्वस्य सहस्रभुजैः सह योद्धुं समागतोऽभवत्। तस्य वाणस्य प्रहारं सुदर्शनचक्रेण विच्छेद्य भगवान् तस्य वाहून् शाखा इव कर्तयामास। भगवान् शिवः ततः भक्तानुकम्पया चक्रायुधम् अभाषत। तस्य भगवतः बहुस्तुतिं कृत्वा सः महादेवः तं चक्रपाणिं तुष्टाव। तस्य महेश्वरस्य कथनानन्तरं श्रीकृष्णः तस्य अनुग्रहं कृत्वा तस्मै अभयं ददौ। ततः तस्य विशालसैन्यानां संहारं चकार। परिशेषेन तस्य श्रीकृष्णस्य पौत्रं नीत्वा सर्वे द्वारकां प्रति प्रतस्थिरे।

उषसा सह अनिरुद्धस्य विवाहं कृत्वा तां कन्यां स्वीकृत्य द्वारकां प्रति वलरामेण सह सर्वे यादवाः प्रतिजग्मुः। तदानीं द्वारकायां भगवतः विजयोत्सवस्य आनन्देन सर्वे मुखरिताः बभूबुः। श्रीकृष्णस्य विजयस्य गाथा यः श्रोष्यति कलियुगे तस्य कदापि पराजयः न भविष्यति।

बोधप्रश्नः

१. अनिरुद्धः कतिमासान् यावत् उषायाः पार्श्वे आसीत्?

२. वाणासुरं कः जघान?

३. कार्त्तिकेयस्य युद्धं केन सह बभूव?

## नृगोपाख्यानम्

कस्मिंश्चित् समये सर्वे यदवपुत्राः साम्वप्रद्युम्नचारुभानुगदादयः क्रीडनार्थम् उपवनं प्रति जग्मतुः। सर्वेऽपि क्रीडित्वा पिपासिताः सन्तः कूपस्य अन्वेषणं चक्रुः। तस्मिन् निरुदके कूपे एकं चिचित्रं जीवं ददृशुः। तत्र ते सर्वे एकं कृकलासं गिरिनिभं वीक्ष्य विस्मिताः अभूवन्। कृपापरावशः सन्तः सर्वेऽपि तस्य उद्धरणार्थं प्रयत्नं चक्रुः। विविधोपायैः तस्य उद्धरणं कर्तुं सर्वेऽपि नाशक्नुवन्। परन्तु गृहं गत्वा सकलं श्रीकृष्णस्य समीपे प्रोचुः। ततः श्रीकृष्णस्य तस्य कृकलासस्य उद्धरणं स्वीय वामहस्तं प्रसार्य चकार। सः कृकलासः तदानीं कश्चिदेकः देवरूपेण अवतीर्णः जातः। तस्य शरीरस्य वर्णः सुवर्णसदृशः अभूत्।

भगवान् सर्वं ज्ञात्वाऽपि तस्य जन्मनः रहस्यम् अप्राक्षीत्। किमर्थं कुरूपं धृत्वा अस्मिन् कूपे निपतितः इति प्रश्नं पप्रच्छ?

भगवतः प्रश्नं श्रुत्वा सः प्रत्युत्तरं ददौ। सः इक्ष्वाकुतनयः नृगः आसीत्। विदितेषु सर्वेषु महादानीत्वेन अस्य प्रसक्तिः सुतरां भजते। सः भगवन्तं प्रोवाच यत् पृथिव्यां यावत्यः सिकताः वर्तन्ते, आकाशे यावन्तः तारकाः विद्यन्ते, यावत्यः वर्षधाराः विद्यन्ते तथा दानमहं अकार्षीषम्। सर्वाः गावः पयस्विनीस्तरुणी गुणोपपन्नाः कपिलाः

हेमशृङ्गयः च। ताः सर्वाः विविधेषु वस्त्रेषु सुशोभितं कृत्वा दानं चकार। बहवः दानधर्माचरणं कृत्वा यागयज्ञादिकम् अनुष्ठापितवान्। कदाचित् कस्यचित् ब्राह्मणस्य एका गौः मम गोधने आगत्य ताभिः सार्द्धं संपृक्ता जाता। अज्ञानात् तस्याः दानं कस्मैचित् ब्राह्मणाय कृतवान्। तां नीयमानां तत् स्वामी मामेति प्रोवाच। स्वीकृतस्य दानस्य ग्रहीता नृगः मे दत्तवानिति कथयामास। ततः द्वयोः ब्राह्मणयोः मध्ये दृढ़तिक्तता समायाता जाता। ततः नृगं प्रति द्वावपि ब्राह्मणौ समागतौ। ततः एकः ब्राह्मणः त्वदीयं वस्तु एतत् मया गृहीतमिति कथयामास। ततः अपरः ब्राह्मणः चौरिं कृत्वा मम धेनुं दानं कथं कृतवान् इति पप्रच्छ। ततः सः राजा नृगः कथयामास चिन्तामास्तु। एतामतिरिच्य अहं भवते सहस्रसंख्यकां धेनुं ददामि। परन्तु द्वावपि परस्परं कलहे रताः आस्ताताम्। ततः द्वौ ब्राह्मणौ अप्रसन्नमनसा तस्मात् गतौ। ततः यदा नृगस्य समयः समायातः तदानीं सः यमलोकं प्रति ययौ। तत्र गत्वा यमः पप्रच्छ यत् भवान् किम् आदौ ग्रहीतुमिच्छति पापस्य फलमुतवा पुण्यस्य फलम्। ततः सः पापस्य फलं भोक्तमिच्छति इति प्रत्युवाच। ततः सः जीवलोके अधः पतितः। सः कूपे कृकलासरूपेण अवतीर्णः आसीत्। भगवतः स्पर्शेन तस्य पापस्य प्रशमनमभूत्। ततः सः भगवतः आराधनं चकार। सकलेश्वरस्य त्रिलोकीनाथस्य चरणकमले सदा मनः तिष्ठतु इति प्रार्थितवान्।

पुनः श्रीकृष्णः कथयामास यत् ब्राह्मणस्य धनं स्वीकृत्य कश्चित् अपि इहलोके सुखेन स्थातुं न शक्नोति। अतः ब्राह्मणेभ्यः सर्वदा दानं कर्तव्यम्। ब्राह्मणानां धनस्य अपहरणे अशेषग्लानिः उत्पद्यते। ब्राह्मणेभ्यः सदासर्वदा उच्चस्थानं दद्यात्।

बोधप्रश्नः

१. यादवपुत्राः क्रीडनार्थं कुत्र जग्मुः ?

२. कूपात् भगवान् श्रीकृष्णः कस्य उद्धरणं चकार ?

३. कः अस्मिन् लोके सुखेन स्थातुं न शक्नोति ?

## वलरामस्य व्रजगमनम्

कदाचित् सर्वान् दैत्यान् पराजितं कृत्वा वलरामः व्रजं प्रति गन्तुं मनसि चिन्तयामास। सुहृद्दिदृक्षुरुत्कण्ठः वलरामः रथमास्थितः व्रजगोकुलं प्रति ययौ। सर्वे वलरामस्य आगमनं श्रुत्वा आनन्देन अभिनन्दनं चक्रुः। स्नेहेन तं वलरामं अभिवाद्य सत्कारं चक्रुः। पिता नन्दः तथा माता यशोदा तस्य वलरामस्य अभ्यर्थनां कृतवन्तौ। गोपवृद्धाः च विधिवत् अभिवन्दनं कृत्वा तेन सह वार्तालापं चक्रुः। अन्येषां द्वारकावासिनां विषये अपि गोकुलजनाः पप्रच्छुः। सर्वेऽपि अन्ये श्रीकृष्णस्य विषये पृष्टवन्तः। वलरामस्य दर्शनं कृत्वा सर्वेऽपि भावविह्वलेन गद्गदाः अभूवन्। सर्वे गोपजनाः स्वीयविषयानुगुणम् अहमहमिकया एकस्य कथनानन्तरम् अन्यस्य कथनं प्रारब्धुं प्रयतते स्म। सर्वे श्रीकृष्णस्य विषये बहु पृष्टवन्तः। परन्तु वलरामः कथाचातुर्येण सर्वं यथासाम्यं प्रबोधयामास। वसन्तकालीनमासद्वयं तत्र वलरामः आसीत्।

रात्रौ यमुनायाः जलप्लावने तथा उपवने वलरामः गोपजनैः सार्द्धं रमणम् अकरोत्। वरुणेन प्रेषिता देवी वारुणी वृक्षकोटरे स्थित्वा स्वगन्धेन अवासयत्। तं गन्धं मधुधारया वायुना अपहृतमासीत्। मदविह्वललोचनः सन् वलरामः तस्य यमुनायाः उपवने विचरयामास। मदविह्वलेन यमुनां वलरामः आहूतवान्। सः मदविह्वले एवमेव आह्वयति इति विचिन्त्य यमुना अवज्ञां कृतवती। ततः वलरामस्य प्रकोपं दृष्ट्वा क्षमायाचनामकरोत्। ततः वलरामने स्वीयलङ्गेन यमुनां स्वमाकृष्य आनेतुं प्रयासः विहितः। अद्यापि वलस्यानन्तवीर्यस्य शौर्यं सूचयति सा यमुना । अनेन प्रकारेण मदेन वलरामः व्रजपुरे विहारं चकार।

बोधप्रश्नः

१. वाणासुरस्य संहारात्परं वलरामः कुत्र जगाम ?

२. वलरामः रात्रौ मदिरां पीत्वा कुत्र विभ्रमत् ?

३. यमुनानदी कस्य शौर्यं सूचयति ?

## सारांशः –

अस्मिन् अध्याये अनिरुद्धस्य विषये चर्च्यते। अनिरुद्धं स्वप्ने वाणासुरस्य कन्या ददर्श। ततः चित्रलेखायाः सहायेन अनिरुद्धेन सह उषसः मिलनम् अभूत्। उषसः पिता वाणासुरः अतीव पराक्रमशाली योद्धा आसीत्। तस्य सहस्रबाहुः इति अन्य नाम प्रथितोऽभूत्। तेन तुष्टः शङ्करः एव तस्य रक्षको बभूव। श्रीकृष्णेन सह वाणासुरस्य प्रवलयुद्धः अस्मिन् अध्याये समुपवर्णितो दृश्यते। अतः अयं विषयः भागवतपुराणस्य मार्मीकतां प्रतिपादयति। ततः राज्ञः नृगस्य उपाख्यानं सुचारुतया प्रतिपादितो दृश्यते। अस्मिन् विषये यदुपाख्यानं वर्तते, तत् ब्राह्मणानां द्रव्याणि नापहर्तव्यानि इति शिक्षयति। श्रीकृष्णः साक्षात् ब्राह्मणानां परमोपासकः इति आत्मानं मनुते। तस्य ब्राह्मणस्य द्रव्याणि अपहरणं कृत्वा न कोऽपि स्थातुं शक्नोति। एतस्य विषयस्य ज्वलन्तमुदाहरणं वर्तते राज्ञः नृगस्य उपाख्यानम्। पुनः वलरामस्य व्रजपुरं प्रति गमनं प्रतिपद्यते।

## आदर्शप्रश्ना:

### लघूत्तरीयप्रश्ना:

१. कृकलासस्य पूर्वजन्मरहस्यम्।

२. गोपजनानां वलरामं दृष्ट्वा प्रसन्नता।

३. चित्रलेखाया: चित्रणम्।

### विश्लेषणात्मकप्रश्ना:

१. वाणासुरस्य पराक्रमं स्पष्टयत।

२. उषाचित्रलेखयो: सम्वादं निरूपयत।

### निबन्धात्मकप्रश्ना:

१. नृगोपाख्यानम् आलोचयत।

२. श्रीकृष्णवृत्रासुरयो: युद्धं विशदयत।

### एकाङ्कप्रश्ना:

१. कृकलास: पूर्वजन्मनि क: आसीत्?

२. रात्रौ वलराम: कस्या: नद्या: तीरे विचचार?

३. श्रीकृष्ण: कस्य उद्धारं चकार?

४. चित्रलेखा का आसीत्?

५. अनिरुद्धस्य पिता क: ?

६. श्रीकृष्ण: कस्य उद्धारं कृतवान्?

७. का नदी भगवत: वलरामस्य अवज्ञां कृतवती?

८. सुन्दराणि चित्राणि का अङ्कितवती?

९. सहस्रभुज: क: ?

१०. इक्ष्वाकुतनयः कः ?

११. नृगः कस्य धेनुं दानमकरोत् ?

१२. वाणासुरं कः रक्षयामास ?

**उत्तराणि**

१. नृगः २. यमुनायाः ३. कृकलकस्य ४. उषायाः सखी ५. प्रद्युम्नः

६.कृकलकस्य ७. यमुना ८. चित्रलेखा ९. वाणासुरः १०. नृगः ११. ब्राह्मणस्य

१२. शिवः

# षष्ठोऽध्यायः

## प्रस्तावना

पूर्वऽस्मिन् अध्याये व्रजवनविहारं तथा श्रीकृष्णेन विविधानां राक्षसानां विनाशः प्रतिपादितः आसीत्। परन्तु अत्र अनेके तादृशाः सन्ति येषां विचारः अधस्तावत् विविच्यते। पौण्ड्रकादीनां विषये यद्यपि सर्वे जानन्ति तथापि भागवतमहापुराणाधारेण अस्य विचारः श्रीकृष्णचरितप्रकथने मार्मीकतां प्रतिपादयति। काशीराजस्य विषये अपि अस्मिन् अध्याये विचारः प्रस्तुतः। ततः द्विविदादि विविधानाम् असुराणां वधविषये श्रुयते। वलरामः शान्तिप्रस्तावं नीत्वा कौरवाणां प्रति गतवान्, परन्तु कौरवाणां तिरस्कारपूर्णवचनेन तेन क्रोधितो बभूव। जाम्ववत्याः पुत्रस्य साम्वस्य विवाहप्रस्तावं नीत्वा वलरामः जगाम। अस्मिन् अध्याये इतोऽपि महत्त्वपूर्णो विषयः वर्तते, यत् भगवतः श्रीकृष्णस्य दर्शनं नारदेन प्राप्तम्। अत्र भगवतः सार्वभौमिकता तथा सर्वव्यापकता परिदृश्यते। तथा इदं रूपं भगवतः न विस्मयपूर्णं वर्तते यतोहि सर्वेषु भूतेषु यस्य सत्ता विद्यते तस्य काभिश्चित् भार्याभिः सह संकीर्णरूपमिदं ददर्श।

## उद्देश्यम् –

अध्यायेऽस्मिन् छात्राः एतान् अंशान् ज्ञास्यन्ति।

- **पौण्ड्रकस्य वधः काशिराजस्य उद्धारः**
- **द्विविदवधः**
- **कौरवाणामुपरि वलरामस्य क्रोधः**
- **साम्वस्य विवाहः**
- **भगवतः अद्भुतं रूपं दृष्ट्वा नारदस्य विस्मयः**

## पौण्ड्रकस्य वधस्तथा काशिराजस्य उद्धारः

यदा वलरामः व्रजपुरे आनन्देन विहरणमकार्षीत् तदानीं करूषाधिपतिः पौण्ड्रकः आत्मानं भगवान् इति मन्यामानः सर्वान् तद्वदाचरणं कर्तुं प्राबोधयत्। श्रीकृष्णं प्रति एकं दूतं प्रेषयामास। सः दूतः द्वारकां प्रति गत्वा सर्वेभ्यः पौण्ड्रकस्य विषये सुश्राव। पौण्ड्रकः एव सकलस्य सृष्टेः आधारस्वरूपः तथा साक्षात् भगवतः लीलादि विधातुं मर्त्त्यमण्डले जनिं लेभे इति प्रोवाच। ततः श्रीकृष्णस्य सभायाम् उपविष्टाः ये आसन् ते सर्वे अस्य वचनं श्रुत्वा अहसन्। ततः आत्मानं वासुदेवः इति मन्यमानस्य पौण्ड्रकस्य अधीने स्थातुं सन्देशः दूतेन प्रेषितः। ततः भगवान् श्रीकृष्णः सैन्यं नीत्वा काशीराज्यं प्रति आक्रमणं चकार, यतोहि पौण्ड्रकः तदानीं तत्रैव आसीत्। सः पौण्ड्रकः काशीराजस्य परममित्रमासीत्।

पौण्ड्रकः अपि भगवतः श्रीकृष्णस्य अनुगुणं कौस्तुभमणिं शङ्खचक्रगदादीनि आयुधानि धृत्वा उपस्थितः अभवत्। भगवान् श्रीकृष्णः काशीराजस्य तथा पौण्ड्रकस्य सैन्यान् जघान। ततः रणस्थलं विविधानां गर्दभानां रथानां घोटकानां खण्डविखण्डितेन शरीरेण पूर्णमभवत्। भगवान् स्वतीरेण पौण्ड्रकस्य रथस्य भग्नं तथा विविधानि अस्त्राणि खिन्नमकरोत्। पौण्ड्रकेन सह काशीराजस्योपरि तीक्ष्णशरप्रहारं चकार।

ततः काशीनरेशेन सह पौण्ड्रकस्य संहारः भगवता कृता वर्तते। काशीराजस्य मस्तकं काशीप्रदेशं प्रति प्रेषयामास। ततः प्रौण्ड्रकस्य बहु भर्त्सनां कृत्वा तस्य उपरि शरसन्धानं कृतवान्। एषः पौण्ड्रकः यद्यपि पापी आसीत्, तथापि भगवतः सदासर्वदा चिन्तने रतः अपि बभूव। मनसि भगवदाचरणं सदासर्वदा अकरोत्। तदर्थं भगवतः सारूप्यं संप्राप्य मुक्तिं प्राप्तवान्। परन्तु काशीराजस्य मस्तकं दृष्ट्वा सर्वे क्रन्दनं कृतवन्तः। ततः काशीराजस्य पुत्रः सुदक्षिणः आसीत्। सः पितृहन्तारमवश्यं हनिष्यामि इति मनसि सङ्कल्पं चकार। ततः भगवतः शिवस्य आरधनां कृत्वा अर्चयामास। अभिचरविधानेन ब्राह्मणैः सह दक्षिणाग्निं परिचरणेन पितृहन्त्रवधोपायः भविष्यति। सङ्कल्पेन सः यथावत् आचरणं कृत्वा साधयामास। ततः तस्मात् कुण्डान्मूर्त्तिमानतिभीषणः तप्तताम्रशिखाश्मश्रुरङ्गारोद्गारलोचनः प्रादुर्भुतः। सा अग्निशिखा द्वारकां प्रति यदा ययौ, द्वारकायां सर्वे जनाः अतीव

म्रियमाणाः सन्तः श्रीकृष्णं प्रति समाययुः। ततः श्रीकृष्णः स्वस्य सुदर्शनेन तस्याः अग्निशिखायाः मोचनं कृत्वा सम्पूर्णं काशीराज्यं भस्मीकृतवान्। सुदक्षिणेन सह ब्राह्मणाः अपि निहताः जाताः।

बोधप्रश्नः

१. पौण्ड्रकस्य परमसखा कः?

२. भगवतः अनुगुणं विचिन्त्य कः आत्मानं भगवान् इति चिन्तयामास?

३. काशीनरेशस्य पुत्रस्य नाम किम्?

## द्विविदवधः

कदाचित् नरकासुरस्य एकः परमसखा आसीत्। द्विविद इति नाम्ना सः प्रथितो बभूव। अयमेकः वानरः, यः सुग्रीवस्य मन्त्री तथा मैन्दस्य भ्राता आसीत्। श्रीकृष्णः नरकासुरस्य संहारं चकार, इति श्रुत्वा श्रीकृष्णस्य निवासस्थाने ये जनाः विराजमानाः आसन् तेषां उपरि बहु क्रोधं प्रकटितवान्। यस्मिन् आनर्त्तदेशे श्रीकृष्णः आसीत्, स च वानरः तस्य देशस्य अतीव ध्वस्तविध्वस्तं कृतवान्। कदाचित् समुद्रमध्ये स्थित्वा सर्वान् जलक्षेपणं कृतवान्, कदाचित् विविधानां प्रस्तराणां क्षेपणं चकार, कुत्रचित् पर्वतगिरिमध्ये जनान् नीत्वा तस्य मुख्यद्वारं पिहितं कारितवान्। एवं रूपेण जनान् पीडयामास। कुलस्त्रियः अपि तस्मात् सकाशात् दुषिताः जाताः।

पर्वतस्य उपरि गत्वा ददर्श यत् वलरामः मदविह्वलितः सन् तत्र उपरेमे। वक्षस्थले पद्ममालां स्वीकृत्य वारुणीं पीत्वा आनन्देन रमणं विहरणं च अकरोत्। ततः तत्रत्यानां दुहितृणामुपरि लाञ्छनं कृतवान्। गर्जनं कृत्वा वलरामस्य अपमानं कृतवान्। पुनः वारुणीं स्वीकृतवान्। अस्य द्विविदस्य एतादृशमाचरणं दृष्ट्वा वलरामः क्रुद्धः अभूत्। ततः अपमानितः वलरामः तस्य उपरि अस्त्रादीनां प्रयोगः अकरोत्। तेन अस्त्रेण अस्य द्विविदस्य शरीरस्य अङ्गानि क्षतविक्षतानि अभूवन्। ततः विविधानां वृक्षाणां शाखाः वलरामं प्रति अक्षेपत्। ततः वलरामः सर्वाः शाखाः प्रतिमुञ्च्य मुसलं स्वीकृत्य प्रहारं कारितवान्। मुसलप्रहारेण इतोऽपि क्रुद्धः वानरः वलरामस्य वक्षस्थलं प्रति प्रहारं

चकार। तस्य प्रहारानन्तरं वलरामः साक्षात् स्वमुष्टिप्रहारं कृत्वा तस्य शरीरस्य क्षतविक्षतमकरोत्। ततः सः द्विविदः वानरः वलरामस्य प्रहारं न सोढ्वा निहतः जातः। ततः द्वारकायां शङ्खनादेन वलरामस्य भूरि प्रशंसा कृता वर्तते।

बोधप्रश्नः

१. नरकासुरस्य परमसखा कः आसीत्?

२. पर्वतस्य उपरि वारुणीं पीत्वा कः उपरेमे?

३. वलरामः कं वानरमहनत्?

## कौरवाणामुपरि वलरामस्य क्रोधः

सर्वे यादवाः अतीव पराक्रमशालिनः आसन्। तेषु वीरेषु जाम्ववत्याः पुत्रस्य साम्वस्य शौर्यम् अतुलनीयम्। अयं साम्वः दुर्योधनस्य कन्यां लक्षणाम् अपहृत्य अगमत्। तस्मिन् गमनमार्गे सर्वेऽपि कौरववीराः तस्य अनुगमनं कृत्वा तेन योद्धुं प्रारभन्त। वलपूर्वकं साम्वस्य वन्धनं कृत्वा सर्वेऽपि कौरवाः तस्य अनादरं चक्रुः। कर्णं स्वीकृत्य सर्वेऽपि कौरवाः अस्त्रशस्त्रादीनि धृत्वा तस्य साम्वस्य वन्धननिमित्तं प्रयासं चक्रुः। ततः पराक्रमशाली साम्वः रुचिरं चापं विस्फूज्य कर्णादीन् षड्रथान् वीरान् च युगपत् सायकैः विव्याध। ततः सर्वे मिलित्वा तं साम्वं विरथं कृत्वा वन्धनपुरःसरं लक्षणया सह तं स्वीकृत्य हस्तिनापुरं प्रति समाजग्मुः।

नारदमुखात् एतादृशं वचनं श्रुत्वा सर्वेऽपि यादवाः तथा श्रीकृष्णश्च रथासीनाः सन्तः हस्तिनापुरं प्रति योद्धुम् आविवेशुः। ततः वलरामः एतान् सर्वान् प्रबोधयामास यत् ते सर्वेऽपि अस्मत् सम्बन्धिनः भवन्ति अतः कलहं न कृत्वा साक्षादेव गत्वा अस्य विचारं करिष्यामि। एवं चिन्तयन् वलरामः हस्तिनापुरं प्रति आजगाम। ततः तस्य वलरामस्य अभ्यर्थनां कृत्वा स्वागतं व्याजहार। एतान् सर्वान् दृष्ट्वा वलरामः साम्वस्य विषये परिप्रश्नं पप्रच्छ। अतः उग्रसेनस्य आज्ञया तस्मै लक्ष्मणया सह गन्तुम् आदेशं देहीति अवादीत्। परन्तु न कोऽपि तस्मिन् विषये किमपि

प्रोवाच। अत: वलराममपि बहुविधं भर्त्सनां कृत्वा कौरवा: साम्वं न प्रत्यर्पितवन्त:। अत: परिशेषेन वलराम: क्रुद्ध: सन् स्वीयलङ्गलेन हस्तिनापुरं गङ्गाजले निम्मार्जयितुं प्रयासं कृतवान्। तदानीं यदा जलेन किञ्चत् भागं स्पृष्टमभवत् सर्वे वलरामस्य स्तुतिं कृत्वा तस्य सविनयं निवेदनं चक्रु:।

तत: साम्वेन सह लक्ष्मणाया: विवाहं कृत्वा द्वारकां प्रति प्रेषयामास। अनेन प्रकारेण वलरामस्य प्रकोपात् सर्वे कौरवा: विनष्टात् वञ्चिता: अभूवन्।

बोधप्रश्न:

१. साम्वस्य माता का विद्यते ?

२. दुर्योधनस्य कन्याया: नाम किम् आसीत् ?

३. वलरामस्य क्रोधात् के वञ्चिता: अभूवन् ?

## भगवत: अद्भुतं रूपं दृष्ट्वा नारदस्य विस्मय:

नरकासुरस्य निधानं कृत्वा भगवान् श्रीकृष्ण: द्वारकामागत्य षोडशसहस्त्रकन्याभि: सह विवाहं चकार। तत: श्रीकृष्ण: कथमेकाकी एतभि: सह उपरेमे इति विचिकित्सा कृत्वा भगवान् देवर्षि: नारद: द्वारकां प्रति समाययौ। तस्त नारदस्य उत्सुकता भगवद्दर्शनर्थम् आसीत्। यदा स: द्वारकां प्रति आजगाम तदानीं सर्वादौ विविधमुद्यानं दृष्ट्वा विमोहित: जात:। उद्याने विविधानां पुष्पाणामाघ्रणं कृत्वा तथा सरोवरे विकशितपद्मादीनि पुष्पाणि दृष्ट्वा आनन्दितो बभूव। तत: राजप्रासदस्य शोभां विलोकयन् प्रीतोऽभूत्।

अत्र भगवत: लीला यादृशी वर्तते सा अवर्णनीया अतुलनीया च विद्यते। भगवान् प्रत्येकऽस्मिन् स्थाने भिन्न भिन्नरूपेण विद्यते इति नारद: ददर्श। सर्वादौ कुत्रचित् ब्राह्मणै: सह वेदपाठं कुर्वन्तं श्रीकृष्णम् अपश्यत्। कुत्रचित् स्वस्य पुत्रै: सह क्रीडनसमये ददर्श। विविधाभि कन्याभि: सार्द्धमुपविश्य क्रीडन्तं श्रीकृष्णम् अपश्यत्। विविधेषु स्थानेषु विविधरूपेण भगवत: स्वरूपं नारद: दृष्टवान्।

ततः नारदः एतत् सर्व दृष्ट्वा चिन्तयामास न कश्चिदपि विशेषो वर्तते। भगवान् श्रीकृष्णः सचराचरस्य जगतः सर्वकल्याणमयः पुराणपुरुषोत्तमः वर्तते। अतः तस्य लीला अपारा विद्यते। सांसारे पतितान् सर्वान् सः उद्धरति। तस्य चरणकमलयोः चिन्तनेन मनसि ग्लानि न भवति।

बोधप्रश्नः

१. कस्य लीला अवर्णनीया वर्त्तते ?

२. नारदः सर्वेषु भवनेषु कं ददर्श ?

३. भगवतः कति अवताराः सन्ति ?

## सारांश:

भगवत: श्रीकृष्णस्य अलौकिकता प्रतिपादयितुं नारदमुखेन व्यासदेव: अस्मिन् दशमस्कन्धे यथा प्रत्यपादयत् तत् सर्वजनग्राही भवति। अस्मिन् अध्याये भगवता श्रीकृष्णेन तदनुरूपस्य पौण्ड्रकस्य विनाश: प्रतिपादित:। पुन: काशिराजस्य संहारोऽपि अस्य विषयसंगत: आसीत्। वलरामेण द्विविदस्य संहार: वर्णित:। अस्य अध्यायस्य प्रमुखप्रतिपाद्यविषयो वर्तते यत् भगवत: विविधेषु स्वरूपेषु दर्शनम्। नारद: यदा द्वारकां प्रति आजगाम तदानीं भगवन्तं भिन्न भिन्नस्थाने भिन्नरूपेण ददर्श। पुन: साम्वस्य विवाह: अस्मिन् अध्याये विचारित:। कौरवाणामुपरि वलरामस्य प्रकोप: विहित: वर्तते।

# आदर्शप्रश्नाः

## लघूत्तरीयप्रश्नाः

१. द्विविदवानरस्य पराक्रमः।

२. काश्याः विनाशः।

२. सुदक्षिणस्य तपस्या।

## विश्लेषणात्मकप्रश्नाः

१. नारदस्य भगवत्विषयकं वर्णनम्।

२. द्विविदवधं स्पष्टयत।

३. श्रीकृष्णपौण्ड्रकयोः युद्धवर्णनं निरूपयत।

## निबन्धात्मकप्रश्नाः

१. साम्वेन सह लक्ष्मणायाः विवाहं विशदयत।

२. भगवतः विविधानि स्वरूपाणि आलोचयत ?

## एकाङ्कप्रश्नाः

१. सुग्रीवस्य मन्त्री कः आसीत् ?

२. कः द्विविदस्य संहारं चकार ?

३. पौण्ड्रकः कः ?

४. कः वारुणीं पपौ ?

५. काशीनरेशस्य पुत्रः कः ?

६. साम्वस्य माता का ?

७. कः द्वारकां प्रति ययौ ?

८. साम्वस्य युद्धं कैः सार्द्धमासीत् ?

९. कः भगवत्सदृशम् आचरन् आसीत् ?

१०. श्रीवक्षचिह्न वक्षस्थले कस्य आसीत् ?

११. पतितानामुद्धारकः कः ?

१२. दुर्योधनस्य पुत्री का आसीत् ?

**उत्तराणि**

१. द्विविदः २. वलरामः ३. काशीराजस्य सखा ४. वलरामः ५. सुदक्षिणः ६. जाम्ववती

७. नारदः ८. कौरवैः ९. पौण्ड्रकः १०. भगवतः ११. श्रीकृष्णः १२. लक्ष्मणा

# सप्तमोऽध्याय:

## प्रस्तावना

प्रतिपाद्येऽस्मिन् अध्याये भगवत: विचित्रं रूपं दृष्ट्वा विमोहितस्य नारदस्य विस्मयं समुपवर्ण्यते। भगवत: श्रीकृष्णस्य दिनचर्या सर्वेभ्य: सुतरां प्ररयिष्यति। तत: जरासन्धस्य कारागारे वन्दीराजन्यान् दूत: समागत्य तान् रक्षितुं निवेदयामास। तत: पुन: नारद: राज्ञ: युधिष्ठिरस्य राजसूययज्ञनिमित्तमाह्वानमङ्गीकृत्य कुत्र आदौ गन्तव्यमिति उद्धवाय पप्रच्छ। उद्धवस्य समुचितमन्त्रणायां श्रीकृष्ण: इन्द्रप्रस्थं प्रति जगाम। तत: राजसूययागनिमित्तं प्रवर्तयामास। सर्वे पाण्डवा: विविधान् देशान् अतिक्रम्य सर्वान् विजित्य राजसूययागनिमित्तं प्ररोचयामासु:।

श्रीकृष्णेन सह भीमार्जुनौ मगधदेशं प्रति समाजग्मतु:। तत्र ब्राह्मणवेशेन जरासन्धस्य सविधे युद्धनिमित्तं वरं वव्रे। तत: जरासन्ध: तेभ्य: युद्धनिमित्तं वरं ददौ। सर्वेऽपि भीमजरासन्धयो: युद्धं ददृशु:। परिशेषेन क्लान्त: भीम: श्रीकृष्णस्य इङ्गितेन जरासन्धस्य वधं कारितवान्। केवलं जरासन्धस्य वधोपाय: श्रीकृष्ण: एव ज्ञातवान्। एवान् राजन्यान् विमुच्य जरासन्धस्य पुत्रं सहदेवं राजसिंहासने प्रतिष्ठापयन् अभिषेचनं चकार।

## उद्देश्यम्

अस्मिन् अध्याये एतान् विन्दून् सर्वे ज्ञास्यन्ति।

- भगवत: श्रीकृष्णस्य नित्यचर्या: दूतागमनञ्च
- श्रीकृष्णोद्धवसम्वाद:
- श्रीकृष्णस्य इन्द्रप्रस्थगमनम्
- राजसूययज्ञनिमित्तमायोजनम्
- राजसूययज्ञनिमित्तमायोजनम्
- वन्दीगृहात् निवृतानां राजन्यानां भगवत्स्तुति:
- भगवत: अग्रपूज्यत्वं तथा शिशुपालस्य संहार:

## भगवतः श्रीकृष्णस्य नित्यचर्याः दूतागमनञ्च

रात्र्याः समाप्त्यनन्तरं सर्वे कुक्कुटा जनमानसं मुखरितं कुर्वन्तः कूजन्ति। यदा प्रातः कालः समायाति तदानीं भगवतः सर्वा स्त्रियः कुक्कुटान् कूजतोऽशपन्। यतोहि गभीरनिद्रायां श्रीकृष्णस्य कण्ठ्यं गृहीत्वा शयने रतानां भार्याणां निद्राभङ्गो भवति। प्रातःकाले द्वारकायां पारिजातपुष्पस्य सुगन्धेन सर्वतः परिव्याप्तो भवति। भगवान् श्रीकृष्णः प्रत्यहं ब्राह्ममुहुर्ते शय्यात्यागमकरोत्। तदानीं भगवतः सर्वाङ्गमानन्देन उल्लसितमभवत्। ततः विधिपूर्वकं निर्मलेन जलेन स्नानादि नित्यकर्माणि अकरोत्। शुद्धपुतवस्त्रपरिधानपूर्वकं सन्ध्यावन्दनं कृत्वा मौनेन गायत्र्यादिमन्त्राणां जपमकरोत्। सूर्ये उदिते देवानृषीन् पितृन् वृद्धान् विप्रान् अभ्यर्च्य सूर्योपस्थानमकरोत्। प्रत्यहं ब्राह्मणेभ्यः गोदानमकरोत्। भगवतः विभूतस्वरूपभूतं गोवृद्धब्राह्मणादीन् प्रणम्य स्वकर्ये प्रवृत्तोऽभवत्। दानधर्मपूजार्च्चनादि कार्यं समाप्य विविधानि चन्दनादीनि वस्तूनि धारयित्वा स्ववस्त्रादिकं परिधानमकरोत्। प्रजानां कामनायाः सन्तुष्ट्यनन्तरमेव यत्किमपि कार्यं श्रीकृष्णः अकरोत्। ततः श्रीकृष्णस्य राजसभा एतादृशी आसीत् यस्यां सभायां ये उपविशन्ति तेषां क्षुधा पिपासा मोह क्रोधादिगुणाः न भविष्यति। सर्वाभ्यः भार्याभ्यः अनुमतिं स्वीकृत्य सुधर्मा नाम्नी सभागृहे प्रवेशमकरोत्। आकाशमण्डले चन्द्रमा यथा सुशोभते तथैव यादवेषु श्रीकृष्णः तथैव प्रतिभाति। तस्मिन् समये विविधेषु वाद्यमृदङ्गादिभिः सह भगवतः स्तुतिः क्रियते स्म। तत्र कश्चित् वेदवित् तत्र उपविश्य वेदोक्तमन्त्रान् पठित्वा भगवतः सन्तुष्टिमकरोत्। एवं प्रकारेण भगवतः श्रीकृष्णस्य प्रत्यहं दिनचर्या वर्तते।

एकः राजदूतः जरासन्धेन रुद्धितानां राज्ञां दूतः आसीत्। प्रायः विंशतिसहस्राणि राजानः तस्य वन्दीरूपेण आसन्। सर्वेऽपि राजानः भगवतः श्रीकृष्णस्य शरणार्थी रूपेण आश्रिताः। जगतः पालनकर्ता साक्षात् विष्णोः स्वरूपभूतः श्रीकृष्णः एव तेषां प्राणानां धारकः। तदतिरिच्य न कोऽपि तेषां रक्षको भविष्यति। अतः तेषां राज्ञां दूतोऽहं भवतः समीपं प्रति समाययौ इति दूतः अब्रवीत्। श्रीकृष्णस्य सभास्थले साक्षात् देवर्षिः नारदः समुपागतः आसीत्। सः साक्षात् सूर्यसदृशः प्रतीयमानो दृश्यते। तस्य विधिपूर्वकम् अभ्यर्चनां कृत्वा श्रीकृष्णः तस्य वचनं अश्रृणोत्।

नारदः युधिष्ठिरस्य राजसूययज्ञनिमित्तं भवन्तमाहूतवान्। तस्मिन् यज्ञे भवन्तः पादार्पणं यदि भविष्यति तर्हि अशेषानन्दं सः प्राप्स्यति। तदर्थं भवतः गमनं प्रति व्याकुलेन प्रतीक्षारताः भवन्ति पाण्डवाः। अत्र द्वयोः समाचारं

श्रुत्वा भगवान् श्रीकृष्णः कस्य कार्यमादौ विधेयमिति चर्चां कृतवान्। सर्वे आदौ राज्ञाम् उद्धारविषये प्रोचुः। परन्तु स्व-अमात्याय उद्धवाय श्रीकृष्णः अस्मिन् विषये अप्राक्षीत्।

बोधप्रश्नः

१. युधिष्ठिरस्य राजसूययज्ञार्थं भगवन्तं कः आह्वयामास ?

२. दूतः कस्मात् आगतो वर्तते ?

३. श्रीकृष्णस्य सभागृहस्य नाम किम् ?

## श्रीकृष्णोद्धवसम्वादः

उद्धवः दुरद्रष्टा तथा अमात्येषुं श्रेष्ठः आसीत्। तस्य उद्धवस्य महत्त्वपूर्णानि वचांसि श्रुत्वा साक्षात् श्रीकृष्णः चकितोऽभवत्। यदा जरासन्धस्य कारागारे वन्दीरूपेण राजानः आसन्। ते सर्वेऽपि केनचित् दूतेन सम्वादं प्रेषयामासुः। तेषाम् उद्धरणं पृथिव्यां साक्षात् श्रीकृष्णः एव करिष्यति। तदतिरिच्य न कोऽपि पृथिव्यां वर्तते यः एतान् शत्रून् घातयित्वा सर्वान् रक्षति। अतः तस्मिन् एव समये अन्यः एकः नारदः समागत्य भगवतः इन्द्रप्रस्थं प्रति गन्तुं प्ररोचयामास। यतोहि साक्षात् युधिष्ठिरस्य निमन्त्रणमासीत् यत् श्रीकृष्णः सर्वै सह तत्र अवश्यं यथा भवेत्। एतस्मिन् अवसरे भगवान् श्रीकृष्णः अमात्यस्य उद्धवस्य मन्त्रणां स्वीकृतवान्। उद्धवः भगवन्तं प्रोवाच हे भगवन्! इदानीम् तु इन्द्रप्रस्थं प्रति भवतः गमनम् अवश्यं स्यात्। यतोहि परमप्रतापी राजा युधिष्ठिरस्य राजसूययागे भवतः स्थानं शीर्षं वर्तते। पुनः जरासन्धस्य प्रकोपादपि सज्जनानां रक्षा अपि अवश्यं भवेत्। अतः आदौ इन्द्रप्रस्थं प्रति गत्वा तत्र राजसूययागे सम्मिलिताः भवन्तु। ततः जरासन्धस्य निमित्तं भीमः एकाकी अपेक्षितो वर्तते। यतोहि जरासन्धस्य दशसहस्त्रगजानां वलं वर्तते। भीमेन सह तस्य द्वन्दयुद्धं कारयित्वा संहारं कुर्वन्तु इति अमात्यः उद्धवः प्ररोचयामास। जरासन्धः ब्राह्मणानां प्रियः वर्तते। सर्वेभ्यः ब्राह्मणेभ्यः यथेष्टं सर्वं सर्वदा प्रातःकाले सः ददाति। अतः तेन सह वार्तां कृत्वा ब्राह्मणवेशेन गत्वा द्वन्दयुद्धं स्वीकृत्य युद्धाभिमुखी भवेत्।

जरासन्धस्य वधानन्तरम् अन्यानि अपि बहूनि कार्याणि साधितानि भविष्यन्ति। अत: ब्राह्मणानां पुण्यादेव तस्य पापस्य प्रशमनं भवति। अत: ब्राह्मणवेशेन गत्वा तेन सह द्वन्दयुद्धकारयितुं यदि कांक्ष्यते तर्हि भीमेन स: जरासन्ध: हतो भविष्यति। यदुवंशस्य बृद्धा: अपि उद्धवस्य कथने अनुरक्ता: आसन्। तत: भगवान् श्रीकृष्ण तद्वदाचरणं चकार।

बोधप्रश्न:

१. केषां पुण्यवलेन जरासन्धस्य पुण्यं वर्धते ?

२. क: इन्द्रप्रस्थं गन्तुं भगवन्तं कथयामास ?

## श्रीकृष्णस्य इन्द्रप्रस्थगमनम्

विविधेभ्य: सज्जनेभ्य: अनुमतिं स्वीकृत्य श्रीकृष्ण: इन्द्रप्रस्थं प्रति गन्तु प्रारभत। तत: सन्ततिभि: सह इन्द्रप्रस्थं प्रति निराक्रमत्। स्वस्य गरुडध्वजरथे उपविश्य भगवान् श्रीकृष्ण: चतुरङ्गिणीसेनां स्वीकृत्य जगाम। तस्मिन् समये मृदङ्गादि वाद्येन धरा मुखरिता आसीत्। सर्वा: भार्या: सर्वे पुत्राश्च स्वस्व वस्त्राभूषणं परिधृत्वा तथा सुन्दरचन्दनाङ्गरागपुष्पहारादिभि: सुसज्जिता: सन्त: इन्द्रप्रस्थं प्रति निराक्रमन्। द्वारकायाम् अन्ये च ये सर्वे आसन् स्वस्य आभूषणानि परिधृत्य इन्द्रप्रस्थं प्रति गन्तुम् उद्यता: आसन्। भगवत: आगमनं दृष्ट्वा देवर्षि: नारद: अपि आनन्दानुभवमकरोत्। तत: जरासन्धस्य कारागारात् अगताय दूताय आश्वासनां दत्वा प्रेषयामास। शीघ्रमेव ते सर्वेऽपि राजान: विमुक्ता: भविष्यन्ति इति अकथयत्। जरासन्धस्य विनाश: अवश्यं भविष्यति। अत: आनन्देन मगधं प्रतिगच्छ। तत: दूत: गत्वा सर्वान् सूचयामास, राजान: अत्यन्त प्रीता: आनन्दिताश्च अभूवन्। भगवान् श्रीकृष्ण: आनर्त्तसौवीरमरुकुरुक्षेत्रादि राज्यानि अतिक्रम्य विविधान् पर्वतान् लङ्घनं कृत्वा इन्द्रप्रस्थं प्रति जगाम। पथि दृषद्वती तथा सरस्वती नदीम् उल्लङ्घ्य आजगाम। परमदुर्लभस्य योगेश्वरस्य परमानन्दस्य परमपुरुषस्य दर्शनं दुर्लभं वर्तते। अत: सर्वे भगवत: दर्शनं लब्ध्वा आनन्दिता: अभूवन्। भगवन्तं श्रीकृष्णं दृष्ट्वा युधिष्ठिर मुखरित: अभूत्। सर्वे

पाण्डवाः श्रीकृष्णस्य अभिवादनं चक्रुः। अर्जुनः परमप्रियमित्रस्य आलिङ्गनं चकार। मयासुरः युधिष्ठिरस्य कृते सभागृहस्य निर्माणं कृतवान्। ततः सर्वेऽपि श्रीकृष्णस्य अभिवादनं कृत्वा इन्द्रप्रस्थे सत्कारं कारितवन्तः।

भगवता सह अगतान् सर्वान् अपि अभिवाद्य वस्त्राभूषणादीनि प्रदातुं सर्वे तत्पराः आसन्। एवं प्रकारेण श्रीकृष्णस्य इन्द्रप्रस्थं प्रति आगमनमभूत्।

बोधप्रश्नः

१. के के इन्द्रप्रस्थं जग्मुः ?

२. श्रीकृष्णः कैः सह जगाम ?

## राजसूययज्ञनिमित्तमायोजनम्

राजा युधिष्ठिरः राजसूययागनिमित्तं सकलानां समायोजनं चकार। अस्मिन् राजसूये यागे श्रीकृष्णस्य वन्दनम् अभिवादनं कृत्वा पूजयित्वा तत् कार्यं पूर्तये अनुमतिम् अयाचत्। समेषां पुरतः राजा युधिष्ठिरः श्रीकृष्णं सम्वोधयामास। भगवतः विभूतिस्वरूपभूतः श्रीकृष्णः अस्मिन् प्रपञ्चे श्रेष्ठः आसीत्। अतः राजसूयस्य यज्ञस्य समाप्तिनिमित्तं तस्मात् अनुमतिं यचितवान्। ये जनाः भवन्तः भजनं कुर्वन्ति तेषां किञ्चिदपि पापं न तिष्ठति। परमधाम्नि अमरत्वं सम्प्राप्य सः विष्णुलोकं प्रति व्रजति। साक्षात् कल्पवृक्षसदृशः भवान् अतः राजसूर्ययागनिमित्तं मां प्ररोचय। ततः भगवान् श्रीकृष्णः राजसूययागस्य महत्त्वं प्रतिपदयामास। जगतः मङ्गलमनेन यज्ञेन अवश्यं भवति। भगवतः एतादृशं वचनं श्रुत्वा युधिष्ठिरः गद्गदितः अभूत्। राजा युधिष्ठिरः सर्वान् अनुजान् दिग्विजयकर्तुं प्रेषयामास। भगवान् साक्षात् वासुदेवः स्वस्य शक्तिसञ्चारं कृत्वा तान् रक्षयामास। ततः धर्मराजयुधिष्ठिरः सृञ्जयवंशनृपैः सह सहदेवं दक्षिणस्यामादिशत्। नकुलं मत्सदेशस्य वीरैः सह प्रतीच्यां दिशि प्रेषयामास। ततः अर्जुनं सव्यसाचीम् केकयदेशस्य वीरैः सह उदीच्यां दिशि प्रेषयामास। वृकोदरं भीमं मद्रदेशस्य वीरैः सह प्राच्यां प्रेषयामास। ते च वीराः सर्वान् विजित्य स्व ओजसा अजातशत्रवे भूरि द्रविणं यक्ष्यते।

बोधप्रश्न:

१. भीमसेन कै: सह प्राच्यां दिशि गतवान्?

२. श्रीकृष्णं दृष्ट्वा कस्य मनसि आनन्द: जात: ?

## जरासन्धस्य विनाश:

सर्वान् वीरान् नृपान् च विजित्य सर्वेऽपि इन्द्रप्रस्थं प्रति पुन: प्रतस्थिरे। परन्तु जरासन्धस्य विनाशं विना कथं सर्वान् कश्चित् जयं कृत्वा राजसूयं यागम् अनुष्ठापयिष्यति। तत: श्रीकृष्णस्य प्ररोचनायां भीमार्जुनाभ्यां सह श्रीकृष्ण: मगधदेशं प्रति समायात:। तत: ब्राह्मणेभ्य: जरासन्ध: दानं कुर्वन् आसीत्। एते सर्वे ब्राह्मणानां रूपं धृत्वा जरासन्धं प्रति स्वीयावेदनं चक्रु:। तत: एतान् ब्राह्मणान् दृष्ट्वा जरासन्ध: अतीव प्रीतोऽभूत्। कश्चिदपि दानं विना यज्ञानुष्ठानं विना इहलोके यशप्राप्ति: न करिष्यति। अत: अस्मभ्यं दानं देहि। यदि सङ्कल्पं कृत्वा वदिष्यति तर्हि अवश्यं अस्माभि: याचना क्रियते। विना सङ्कल्पेन किमपि ग्रहीतुम् अस्मत्पक्षे न भवति। अत: जलं धृत्वा संकल्पं कृत्वा यथेष्टं दास्यामि इति प्रोवाच। राजा हरिश्चन्द्र: शिवि: रन्तिदेव तथा वलिव्याध: एते सर्वेऽपि स्वीयद्रविणं सर्वस्वं च दत्वा ध्रुवं पदं प्राप्तवन्त:। अत: निराशं न कृत्वा सङ्कल्पेन दानं देहीति ब्राह्मणवेशेन श्रीकृष्ण: प्रार्थितवान्।

जरासन्ध: एतान् दृष्ट्वा चिन्तयामास यत् एते सर्वे कदाचिदपि ब्राह्मणा: न भवन्ति। स्वरैराकृतिभि: प्रकोष्ठैर्ज्याहतै: एतान् दुष्टपूर्वान् इति अचिन्तयत्। यद्यपि एते क्षत्रिया: सन्त: ब्राह्मणरूपेण विभ्रति तथापि भिक्षितं तेभ्य: ददामि इति मनसि अचिन्तयत्। वले: कीर्ति: श्रूयते इदानीमपि, अत: सङ्कल्पेन सर्वं ददामि। तत: उदारमति: कृष्णार्जुनवृकोदरान् इप्सीतं वरं व्रियतामिति प्राह।

श्रीकृष्ण: प्राह हे राजन्! वयं नान्नकांक्षिण: वयं युद्धार्थिन:। युद्धमस्मभ्यं देहि यदि द्वन्दयुद्धं दातुमिच्छति तर्हि अस्माकं मङ्गलं भविष्यति। तत: जरासन्ध: भवन्ते के इति पप्रच्छ। श्रीकृष्ण: सर्वेषां परिचय: कारितवान्। तत: पूर्वसङ्कल्पितरूपेण तेभ्य: युद्धं दत्तवान्। तत: कृष्णार्जुनाभ्यां सह योद्धुं न इयेष। भीम: तस्य उपयुक्त: योद्धा इति

मन्वान: जरासन्ध: तेन सह युद्धं चकार। भीमेन सह युद्धसमये तावत् द्वावपि अशोभताम् यत् रङ्गमञ्चे द्वौ अवतीर्णौ। द्वयो: गदाया: प्रहारवेलायां तादृश: निक्वण: रारादते येन द्वयो: गजयो: यथा दन्तयो: घर्षणेन शब्द: उत्पद्यते। द्वन्दयुद्ध उभावपि पराक्रमशालिनौ आस्ताताम। बहुसमयं व्यतीते अपि कस्य किमपि क्षतं नाभूत्। अत: यथा जरासन्धस्य वलमासीत् तथा भीम: तस्य प्रहारं सोढुं समर्थो अभूत्। पुन: भीमस्य प्रहारमपि सोढुं जरासन्धस्य स्कन्धे वलमासीत्। अत: भीम: अपि क्लान्त: विदन्नमनसा तस्य विनाशं कर्तुं न समर्थो बभूव। एवं विचिन्तयन् तस्य वधोपायं संज्ञया विटपं पाटयन् दर्शयामास। तत् विज्ञाय प्रहरतां वर: भीमसेन: भूतले पादयो: गृहीत्वा शरीरस्य द्विभागं चकार। तत: सहसा तस्य छिन्नशरीरं पुन: संयोगमभूत्। तत: इतस्तत: तस्य शरीरं प्रक्षेपयामास। सर्वे एकपादोरुवृषणकटिपृष्ठस्तनांसके एकवाह्वक्षिभ्रुकर्णे शकले प्रजा: ददृशु:। तस्य जरासन्धस्य निधनं दृष्ट्वा सर्वे अतीव आनन्दिता: अभूवन्। सर्वे च जना: भीमं पूजयामासतु:। मगधस्य राजसिंहासने जरासन्धस्य पुत्रं सहदेवं प्रतिष्ठापयन् सर्वान् नृपान् मोचयामास।

बोधप्रश्न:

१. के ब्राह्मणवेशेन जरासन्धं प्रति जग्मतु: ?

२. जरासन्धं क: अहनत् ?

## वन्दीगृहात् निवृतानां राजन्यानां भगवत्स्तुति:

भगवान् श्रीकृष्ण: सर्वान् राजन्यान् मोचयित्वा जरासन्धस्य पुत्रं सहदेवं मगधदेशस्य सिंहासने प्रतिष्ठापयामास। तत: सर्वे नृपा: वन्दीगृहात् निवृत्ता: अभूवन्। बहुकालादेव तस्मिन् गृहे स्थित्वा तेषां वस्त्राणि मालिन्यानि जातानि। शरीरस्य तेज: नासीत्, क्षुधया शरीरं क्लान्तमासीत्। ते सर्वेऽपि राजान: श्यामलवर्णस्य श्रीकृष्णस्य मुखं दृष्ट्वा अशेषशान्तिमन्वभवन्। चतुर्भुजविष्णो: स्वरूपस्य श्रीकृष्णस्य दर्शनानन्तरं तेषां क्षुधातृषार्तगतग्लानि व्यपगता जाता। सर्वेऽपि राजान: श्रीकृष्णस्य चरणकमले शतशतप्रणामाञ्जलिं ज्ञापयित्वा आलिङ्गनं चक्रु:। सर्वे वन्दीगतक्लेशात् विमुच्य आनन्देन श्रीकृष्णस्य जयजयकारं चक्रु:। तत: सर्वे भगवन्तं

तोषयन्तं ध्यायन्तः आसन्। शरणागतानां दु:खसन्तापहारी साक्षात् भगवान् श्रीकृष्णस्य जगतः स्वामी वर्तते। वयं तं श्रीकृष्णं नमस्कूर्मः। घोरसंसृतेः प्रपन्नान् कृष्णः एव त्रायति। हे मधुसूदन! अस्माकं परमं सौभाग्यं वर्तते यत् भवतः दर्शनमनुग्रहं वयं सर्वे राज्यलक्ष्मीं त्यक्त्वा प्राप्तवन्तः। यतोहि यः राजा ऐश्वर्ये स्थित्वा ध्यायति कदाचित् सः विलम्वेन प्राप्नोति, परन्तु आर्त्तजनानां दु:खसन्तापहारकः श्रीकृष्णः अस्मान् शीघ्रमभ्यर्थितवान्। सर्वे राजानः राज्यभोगं मृगतृष्णा इव इति चिन्तयन् श्रीकृष्णस्य ध्यानं कुर्वन्तः आसन्।

सर्वादा सर्वं परित्यज्य श्रीकृष्णे मनोनिवेष्टुं सर्वे प्रयत्नरताः आसन् । ततः भगवान् तेभ्यः समेभ्यः यथेष्टं वरं वरयामास। ततः भीमार्जुनाभ्यां सह इन्द्रप्रस्थं प्रति समाजग्मुः। युधिष्ठिरः श्रीकृष्णस्य एतादृशमनुग्रहं चिन्तयन् तं प्रति प्रेमवर्षनं चकार।

बोधप्रश्नः

१. किं मृगतृष्णा इव भवति?

२. जरासन्धस्य पुत्रः कः?

### भगवतः अग्रपूज्यत्वं तथा शिशुपालस्य संहारस्तथा राजसूययज्ञस्य समापनं

जरासन्धस्य विनाशं कृत्वा भक्तवत्सलः भगवान् श्रीकृष्णः सर्वान् राजन्यान् मोचयामासः। परिशेषेण सहदेवं राजसिंहासने अभ्यर्चयन् तस्मात् प्रतस्थौ। युधिष्ठिरस्य राजसूययागे सर्वे नरपतयः राजानः मन्त्रिणः अनुचराः समागताः आसन्। यज्ञस्य शुभसमयोपनीते सर्वे ब्राह्मणेभ्यः पुरोहितरूपेण वरयामासुः। तेषु ब्राह्मणेषु कृष्णद्वैपायनव्यासदेवभरद्वाजसुमन्तुगौतमअसितवसिष्ठच्यवनकण्वमैत्रेयक्रतुपैलपराशरगर्गवैशम्पायनअथर्वकश्यपधौम्यपरशुरामशुक्राचार्यआसुरिवीतहोत्रमधुच्छन्दावीरसेनाकृतव्रणादयः ब्राह्मणाः वरणार्थं समुपागताः आसन्। एतदतिरिच्यं भीष्मद्रोणकृपाचार्यधृतराष्ट्रदुर्योधनादयः सर्वे कौरवाः समुपागताः आसन्।

प्राचीनकाले वरुणदेवस्य यज्ञे यथा सर्वाणि यज्ञपात्राणि सुवर्णनिर्मीतानि आसन् तथैव युधिष्ठिरः अपि सर्वाणि द्रव्याणि सुवर्णेन निर्मीतवान्। युधिष्ठिरस्य सन्देशं स्वीकृत्य देवाधिपतिः इन्द्रः समुपस्थितः आसीत्। महादेववरुणब्रह्मालोकपालादयः सर्वेऽपि तस्मिन् यज्ञे आहूताः आसन्।

कः अग्रपूज्यः कस्य सर्वादौ पूजनं भवेत्? अस्य विमर्शने सर्वे तत्पराः आसन्। तस्मिन् समये सहदेवः सर्वादौ उत्थाय प्रोवाच, भगवान् श्रीकृष्णः एव अग्रपूजायाः अधिकारी। सः एव सकलचराचराणां जीवानामधिश्वरः। परमपुरुषः श्रीकृष्णः जगतः त्रितापहरणकारी, भक्तवत्सलः महायोगेश्वरः परब्रह्म वर्तते। श्रीकृष्णस्य अनुग्रहमाध्यमेन एव सकलानां जीवानां गतिः भवति। धर्मराजः युधिष्ठिरः अपि सहदेवस्य विचारं युक्तिसम्मतमिति प्रोवाच। ततः सभायां सर्वे ये आसन् ते श्रीकृष्णस्य अग्रपूज्यत्वमङ्गीकारं चक्रुः। एतस्मिन् शुभसन्दर्भे सर्वे भावविह्वलिताः आसन्। भगवन्तं सभासने अलङ्कृतं कृत्वा वस्त्रादीनि सर्वे समर्पितवन्तः। सर्वेऽपि भगवतः श्रीकृष्णस्य जयजयकारं चकार।

तदानीं सभायामासीनः शिशुपालः भगवतः श्रीकृष्णस्य अग्रपूज्यत्वं नाङ्गीकृतवान्। श्रीकृष्णस्य यशोगानं श्रृत्वा सभायां शिशुपालः कोपेन श्रीकृष्णस्य भर्त्सनामकरोत्। कश्चित् गोपालः कथं सभायामग्रपूज्यः भविष्यति? सर्व अत्र विपश्चितः सन्ति, परन्तु किमर्थमस्य गोपालस्य स्तुतिः क्रियते। सर्वधर्मवहिष्कृतः वर्णाश्रमकुलापेतः स्वरवर्त्ती गुणैर्हिनः कथमग्रपूजायाः अधिकारी अर्हति? राजा ययाति अस्य कुलं प्रति अभिशापं दत्तवान्। कुत्सितवंशे अस्य जन्म अभूत्। वेदशून्यः सन् समुद्रमध्ये गत्वा निवसति। सर्वे विपश्चितः अस्य वंशस्य निन्दां कुर्वन्ति।

श्रीकृष्णस्य निन्दां न सोढ्वा सर्वे इतस्ततः अविभ्रमन्। परन्तु परिशेषेन श्रीकृष्णः स्वस्य तीक्ष्णचकेण तस्य शिशुपालस्य मस्तकच्छेदनं चकार। यः भगवन्निन्दा आचरति तस्य पुण्यं सहसा क्षयं भवति। क्षीणे पुण्ये सः नर्के निवसति। अतः शिशुपालस्य भगवन्निन्दा तस्य विनाशस्य कारणमभूत्। शिशुपालस्य मरणानन्तरं तस्य आत्मा श्रीकृष्णस्य शरीरे लीनोऽभूत्। अनेन प्रकारेण भगवान् श्रीकृष्णः युधिष्ठिरस्य राजसूययज्ञस्य पूर्णमकरोत्। युधिष्ठिरः सर्वेषां यथायोग्यं सत्कारं कृत्वा अभ्यर्थनमभिवादनञ्च चकार।

सर्वे युधिष्ठिरस्य राजसूययज्ञं दृष्ट्वा आनन्दिताः बभूवुः। अस्मिन् राजसूययागे सर्वे भिन्नभिन्नकार्ये रताः आसन्। सर्वयज्ञकर्मणि विविधेषु कार्येषु अनुरक्ताः आसन्। भीमः भोजनशालायाः दायित्वं स्वीकृतवान्। कोषाध्यक्षरूपेण दुर्योधनः आसीत्। सहदेवः अभ्यागतानां सत्कारकर्मणि नियुक्तो बभूव। नकुलः विविधसामग्री

संयोजने सहायको आसीत्। अर्जुन: गुरुजनानां सेवायामासीत्। परिवेषणे द्रुपद: सहायको बभूव। कर्ण: दानकार्ये लिप्त: आसीत्। श्रीकृष्ण: साक्षात् सर्वेषां सेवायामासीत्। अनेन प्रकारेण सात्यकिविकर्णहार्दिक्यविदुरभूरिश्रवादि विविधेषु कार्येषु नियुक्ता: आसन्। धर्मराजस्य युधिष्ठिरस्य राजसूययागस्य पूर्णता आगता।

तत: यज्ञस्य समाप्त्यनन्तरं स्नाननिमित्तं सर्वेऽपि गङ्गानद्या: कूले आसन्। सर्वे विविधयज्ञसाग्र्या: शरीरे धारणं कृत्वा गङ्गाजले स्नानं चक्रु:। स्नानसमये मृदङ्गादि वाद्येन तत् स्थानमुखरितमभूत्। सर्वा: देव्य: सर्वे च देवा: तस्य युधिष्ठिरस्य राजसूययज्ञं द्रष्टुं समागता: आसन्। स्नानानन्तरं युधिष्ठिर: नूतनवस्त्रधारणं कृत्वा सकलाभूषणेन सुसज्जित: आसीत्। सर्वेषामनुजानां सहायेन तथा अन्येषां सहायेन राजा युधिष्ठिर: राजसूययज्ञस्य परिसमाप्तिं चकार।

**भोधप्रश्न:**

१. चेदीनरेश: क: ?

२. क: अग्रपूज्य: बभूव ?

३. के के विविधेषु कार्येषु नियुक्ता: आसन् ?

## दुर्योधनस्य अपमानम्

कदाचित् राजसूययज्ञस्य समाप्त्यनन्तरं युधिष्ठिर: अन्त:पुरे विहारं चकार। अन्त:पुरस्य सौन्दर्यं दृष्ट्वा दुर्योधनस्य मनसि इर्षा आगता। पाण्डवानां कृते मय: यत् गृहं निर्मितवान् तत् दृष्ट्वा सर्वेषां लालसा सामगता आसीत्। तथा द्रौपद्या: प्रति अनुरक्त: दुर्योधनस्य मनसि असूयाभाव: समायात: जात:। कदाचित् मयेन निर्मितस्य सभागृहस्य अन्त: सर्वे पाण्डवा: श्रीकृष्णेन सह उपविष्टा: आसन्, परन्तु तस्मिन् समये दुर्योधनदु:शासनादय: तत्र समागता: जाता:। क्रोधवशत: दुर्योधन: सर्वेषां द्वारपालानामुपरि विरक्तभावं प्रकटयामास। तत: सभागृहे दुर्योधन: स्थलं जलं विचिन्त्य वस्त्रं उपरि कृतवान्, तथा जलं स्थलं विचिन्त्य मायाविमोहित: अभूत्। तदानीं सर्वे अर्जुनादय: अहसन्। तत: महामानी दुर्योधन: लज्जितोऽभवत्।

युधिष्ठिरः सर्वान् अनुजान् न हसितुं कथयामास परन्तु श्रीकृष्णस्य छलेन सर्वे पुनः अहसन्। ततः दुर्योधनस्य मनसि खिन्नभावना समागता जाता।

भोधप्रश्नः

१. सभागृहः केन निर्मितः ?

२. द्रौपद्याः प्रति कः अनुरक्तः आसीत् ?

३. जले स्थलस्य भ्रमः कस्य अभूत ?

## सारांश:

सकलानां जीवानां मोक्षदायकपरब्रह्मपरात्परः परमस्वरुपःभगवान् श्रीकृष्णः समेषां जीवानां पालनकर्ता वर्तते। दुष्टानां दमनार्थं सदासर्वदा असौ धरापृष्ठे जनिं लेभे। परन्तु साधूनां रक्षणमस्य परब्रह्मणः महद्दुद्देश्यं वर्तते। तदर्थं जरासन्धादीनां दुष्टानां संहारं कर्तुम् अवतरति। जरासन्धस्य वन्दगृहे स्थितान् सर्वान् राजन्यान् रक्षार्थं कश्चित् दूतः आगत्य आवेदनं चकार। ततः भगवान् युधिष्ठिरस्य राजसूययज्ञनिमित्तं जगाम। तस्मात् भीमार्जुनाभ्यां सह तस्य जरासन्धस्य विनाशं कारितवान्। युधिष्ठिरस्य राजसूययागे शिशुपालस्य वधं चकार। ततः राजसूये यागे सः अग्रपूज्यरूपेण अभ्यर्थनां कृतवान्। श्रीकृष्णः युधिष्ठिरस्य राजसभायां यदा उपविष्टः आसन् तदानीं दुर्योधनस्य परिहासं कारितवान्। दुर्योधनः यदा पाण्डवानां कृते निर्मितसभागृहे स्थलं जलमिव भ्रमः अभवत्।

# आदर्शप्रश्ना:

## लघूत्तरीयप्रश्ना:

१. जरासन्धस्य वध:।

२. दुर्योधनस्य अपमानम्।

३. राजन्यायां भगवत्स्तुति:।

## विश्लेषणात्मकप्रश्ना:

१. राजसूययागस्य समापनम्।

२. भगवत: इन्द्रप्रस्थगमनम्।

## निबन्धात्मकप्रश्ना:

१. श्रीकृष्णोद्धवसम्वादस्य वर्णनं कुरुत।

२. भगवत: श्रीकृष्णस्य दिनचर्या स्पष्टयत।

## एकाङ्कप्रश्ना:

१. भगवत: दर्शनार्थं क: आजगाम ?

२. जरासन्धस्य वधं क: चकार ?

३. क: राजसूययाग: अकरोत् ?

४. दुर्योधनस्य कुत्र भ्रमो जात: ?

५. क: अग्रपूज्यस्य अधिकारी आसीत् ?

६. क: खाण्डववनं ददाह ?

७. के दूतं प्रेषयामासु: ?

८. राजसूययागे पाककार्ये क: विनियुक्त: आसीत् ?

९. शिशुपालं क: जघान ?

१०. श्रीकृष्णस्य दिनचर्यां कः ब्रवीति ?

११. चेदीनरेशः कः ?

१२. भोजनपरिवेषणे कः सहायको बभूव ?

## उत्तराणि

१. नारदः २. श्रीकृष्णः ३. युधिष्ठिरः ४. सभागृहे ५. श्रीकृष्णः ६. अर्जुनः

७. वन्दीनृपाः ८. भीमः ९. श्रीकृष्णः १०. नारदः ११. शिशुपालः १२. द्रुपदः